अलसिङ्गभट्टविरचिता

वज्रमकुटीविलासचम्पूः

VAJRAMAKUTĪVILĀṢA CAMPŪ

OF

ALASINGABHAṬṬA

Edited by

Dr. K. RAJAGOPALACHAR, M.A., PH.D.

Principal, Vijaya College, Bangalore-4

वज्रमकुटीविलासचम्पूः

VAJRAMAKUTĪVILASACHAMPU

Edited by

Dr. K. RAJAGOPALACHAR, M.A., Ph.D.

1983

First Edition 1983

Price Rs. 20.

For Copies apply to:

Dr. K. Rajagopalachar
684, 11-A Main
V Block, Jayanagar
Bangalore-41

Printed by D. S. Krishnachar at Prabha Printing House,
22-A, Dr. D. V. Gundappa Road, Basavanagudi, Bangalore-4

PREFACE

In the course of my search for Campū Kāvyas (most of them lying still as manuscripts) for my doctorate thesis, two copies of the present text in Sanskrit College, Melkote (No. S 242-3), one in grantha script and another in Telugu Script having 50 leaves, were noticed. The former copy worm-eaten is in a very bad condition. In the Oriental Research Institute, Mysore also I was able to notice two copies S P 2919 and S P 3663 in Grantha Script. I was surprised to find that in the catalogue, the author's name was variantly given: in one copy as Alasingabhatta's and in another as Yogānanda's. The same has been recorded in History of Classical Sanskrit Literature (P 521) by M. Krishnamachariar noticing them under local Campūs. But proper verification convinced me that the work was written by Alasingabhaṭṭa and not by Yogānanda.

Dr. G. Marulasiddiah, Director of Oriental Research Institute Mysore, my teacher in Maharaja's College, Mysore during 1949-54, was kind enough to get the MS No. 3663 copied for me, so that I could have a comparative reading of the manuscripts. To him and to Vidwan R. Ramasastri, O.R.I., Mysore, who copied the manuscript, I offer my profound sense of gratitude. Otherwise, I would never have ventured to bring out this edition. I must acknowledge the invaluable guidance offered throughout by my preceptor Sri S. Ramachandra Rao, M.A., Retired Professor of Sanskrit, University of Mysore.

I offer my sincere thanks to Panditaraja N. T. Srinivasa Iyengar, who has blessed me with a scholarly foreword in Sanskrit. I will be failing in my duty if I do not acknowledge the help of Vidwan Areyar Ramasharma, Melkote who placed at my disposal some details regarding the poet.

My ardent desire to contribute something to popularise Melkote, my birthplace, has been the urge for bringing out this book with no financial aid from any organisation. The financial commitment involved herein, I could take up, on account of the loan that Sri B. N. Murthy, Manager of the Canara Bank, Jayanagar, was able to sanction. My thanks are due to him.

Sri D. S. Krishnachar, M.Sc., Proprietor, Prabha Printing House, Bangalore, has been a source of inspiration to get my articles and books printed and published now and then. He has extended to me full co-operation throughout, in getting this text also printed. ' How else can I conclude this, except by quoting the famous line—' कर्तारस्सुलभा लोके विज्ञातारस्तु दुर्लभाः ' !

Bangalore
23-6-1983

K. Rajagopalachar

॥ श्रीः ॥

प्रस्तावना

संस्कृतसाहित्ये केवलपद्यमयात् तथा केवलगद्यमयाच्च प्रबन्धात् विशिष्टं स्थानमलङ्करोति गद्यपद्यमिश्रा कृतिः या चम्पूप्रथामश्नुते । गद्यानुबन्धरसमिश्रितपद्यसूक्तिर्हृद्या हि वाद्यकलया कलितेव गीतिरिति रसज्ञस्य भोजराजस्य सूक्तिरस्मिन् विषये । रसभावभाञ्जि छन्दोनिबद्धानि पद्यकाव्यानि निर्मातुं कुशलिनोऽपि कतिचन कवयः हृद्यगद्यप्रबन्धनिर्माणे कुण्ठितशक्तयस्तथा नव्यान्यनवद्यानि भावपूर्णानि गद्यकाव्यानि सहृदयमनोल्लासीनि विरचयितुं पटवोऽपि कतिचन, भव्यपद्यप्रबन्धनिर्माणनैपुणविधुराः सन्दृश्यन्ते । गद्यपद्यसंमिश्रणरूपस्य चम्पूप्रबन्धस्य निर्माणं कौशलमपूर्वमधिकमपेक्षत इति विद्वद्रसिकानामभिप्रायः । रसिकेष्वपि कतिचन पद्यानुभवलोलुपाः, केचनगद्यानुभवप्रियाः । उभयेषाममीषां स्वादाय कल्पमाना चम्पूर्विशिष्यते । निपुणैर्महाकविभिः प्रणीतेषु चम्पूप्रबन्धेष्वनेकेषु कतिपये केवलं चक्षुर्गोचरा विलसन्ति । सहृदयमानसावर्जनचणाः पण्डितलोकाभिनन्द्या अपि अनेके विशिष्टा चम्पूप्रबन्धाः मुद्रणप्रकाशनादिकमलभमाना अद्यापि शेरते तालपत्रकोशेषु ।

यदुशैलक्षेत्रमध्यूषुषः अनवरतनारायणाराधनाधिगतपुण्यपुञ्जस्य मौञ्जयायनकुलावतंसस्य योगानन्दाभिधस्यार्चकवरस्य तनूजन्मा निसर्गसिद्धकविताशक्तिमान् सकलागमरहस्यविद् कविकेसरी सुगृहीतनामधेयः श्रीमान् अळशिङ्गभट्टः वज्रमकुटीविलासचम्पूकृतेरेतस्याः निर्माता इति स्पष्टमवगम्यते ।

स्वतातपादादेवाधिगतभगवच्छास्त्रेण अनेन कविना श्री भाष्यकारस्तुतिरूपं हृद्यपद्यशतविभूषितं काव्यं श्रीसात्वततन्त्रस्य भव्यं भाष्यं, ईश्वरतन्त्रस्य व्याख्यानं प्रणायीति निरवद्यसुविद्यहृद्यपद्यशतसंस्तुतश्रीभाष्यकारेण श्रीसात्वततन्त्रभाष्यकारेण व्याख्येतेश्वरतन्त्रेण अळशिङ्गभट्टदीक्षितेनेति आत्मानं निर्दिशन्त्या कविगिरा निश्चीयते । "वर्धन्तां तद्वदेतत् कविवर-

रचिताः सुप्रबन्धाश्च भूमौ " इति ग्रन्थान्ते आशंसनवाक्यं च अन्यानपि कतिचन सुप्रबन्धान् कविप्रणीतान् सूचयति ।

अष्टनवत्युत्तरद्विशतपद्यैर्द्वयैः संशोभितेऽस्मिन्ननतिविस्तरे चम्पूप्रबन्धे नोच्छ्वासस्तवकादिविभागः संलक्ष्यते चम्पूकृतिष्विवेतरासु । लक्ष्यते च रूपकेष्विव अनेकपात्रसंलापमयो वाक्यसंनिवेशः ।

आगमतन्त्रोक्तक्रममनुसृत्य अनुष्ठानविधीनशेषान् यथावद्वर्णयितरि चम्पूकाव्ये भगवद्यागशालायाः यागमन्दिरात् निजमन्दिरं प्रविष्टस्य सुपर्वाभिरवलोकितस्य भगवतो नारायणस्य, लक्ष्मीमन्दिरे विलसन्त्याः पद्मायाः, वज्रमकुटमाबिभ्राणायाः भगवन्मूर्तेः अशेषपापनिबर्हणचणायाः कल्याण्यभिधायाः सरस्याश्च रसपूर्णवाक्यविन्यसनमार्गदेशिकस्य महाकवेर्बाणस्य शैलीमनुकुर्वाणैः विस्तरैर्गद्यभागैः कृतानि चेतोहारीणि वर्णनानि कं वा सचेतसं नानन्दयन्ति नितान्तम्? महतावधानेन यथाप्रदेशं कविना विनिवेशिता उत्प्रेक्षातिशयोक्तिमुखा अलङ्काराः कवेः काव्यालङ्करणवैदग्ध्यातिशयं प्रकाशयन्ति । श्लेषविरोधाभासविनियोगचातुरी कवेः वश्यवाक्तत्वं वैदुष्यमसाधारणं प्रकटयन्ती सत्यमभिनन्दनमर्हति । रसिकमनोल्लासाय दिङ्मात्रमिहोपदर्शयामि—" मधुरामिव भगवद्रामानुजमन्दिरसमाश्लिष्टां, मायामिव मधुसूदनाश्रितां, काशीमिव द्विजराजशेखराधिष्ठितां, अवन्तीमिव वासुदेवविद्याभ्यासगुरुद्विजविशेषालंकृतां, द्वारवतीमिव कृष्णवर्त्मानुसारि यदुभूभृद्राजसामाजिकसमाकुलां इत्यादि .... ।

" धूपाश्रितामपि विधूपाश्रितां, घृतादिद्रव्यैः प्रपूर्णकुम्भालंकृतामप्यप्रपूर्णकुम्भालंकृतां, चतुर्वर्णमण्डलाधिष्ठितामपि प्रथमवर्णमण्डलमात्राधिष्ठितां, भगवत्पुरस्कृतचतुर्वेदिकामपि भगवदधःकृतचतुर्वेदिकां " इत्यादि .... ।

" तुलसीदलार्चनसन्तुष्टयाप्यतुलसीदलार्चनसंतुष्टया, दर्भजाताकलिताघ्र्यादिकयापि विदर्भजाताकलिताघ्र्यादिकया, अभिजातसुन्दरीसंसेवितयापि नाभिजातसुन्दरीसंसेवितया अगराजकन्यकाभीष्टदायिन्यापि नागराजकन्यकाभीष्टदायिन्या द्रौपद्याभिष्टुतयापि अद्रौपद्याभिष्टुतया नलपत्नीकृतसेवनयाप्यनल-

पत्नीकृतसेवनया" इत्यादौ प्रदर्शतो विरोधाभासः कवेः प्रतिभाविलासस्य निदर्शनम्। पद्येष्वनेकेषु समुपयुक्ताः प्रासाः शब्दचमत्कृतयः कवेः सामर्थ्यं प्रदर्शयन्ति।

काव्यप्रियाणां भागधेयेन सांप्रतं कल्याणपुरीस्थ 'विजयाकालेज्' शालायां प्राचार्यपदमलंकुर्वाणेन गभीरसारस्वतह्रदविहारिणा संशोधित-चम्पूप्रबन्धनिकुरुम्बेण अपूर्वप्राक्तनोत्तमकृतिप्रकाशनबद्धश्रद्धेन प्रथितयशसा श्रीमता कोडे राजगोपालाचार्येण मुद्राप्य वज्रमकुटीविलासचम्पूनामापूर्वा कृतिः सर्वेषामक्षिपथं प्रापिता।

श्रीमन्नारायणः मङ्गलमातनोतु तस्मै इति शम्।

पण्डितराजः विद्वान् एन्. टि. श्रीनिवासैय्यंगार्यः

INTRODUCTION

Memorable events and their association with personages commanding reverence from community as a whole or in part, have augured forth the formation of religious beliefs and tradition. They in turn have contributed to recognise certain places connected with religious movements as sacred and a visit to such places of holiness is deemed most beneficial and meritorious. Festivals in honour of deities and great personages and pilgrimages undertaken to sacred places form the nuclei of cultural traits of a land, for they reveal their beliefs and feelings which enrich their own inner life. This is the very nature of human beings all the world over. The Hindu festivals, annual and occasional, in praise of deities and celebrities furnish points of social contact and generate a feeling of oneness among the Hindus reminding them of the ideals for attaining which there was so much struggle. They have left an indelible impression on the community. Pilgrimages undertaken to holy centres on the other hand form an important means of spiritual discipline enabling one engaged in such acts recognise the greatness of elevated souls.

This is commonly found among all nations of the world. Jerusalem for Christians, Mecca for Muslims, Bodh-Gaya for Buddhists, Śravanabelagola for Jains, have all been famous pilgrim centres in the same way as Banaras, Puri-Jagannātha, Vrindāban, Tirupati, Śrīrangam, Kāñcī, Melkote and other places, have been for the Hindus. These and such other places have grown famous for the intense religious beliefs, faith and tradition associating them with the visit or stay of great religious celebrities.[1] They have served as stimulating agencies of religious fervour and have enlivened their life. An air of holiness is spread

---

1. यदध्यासितमर्हद्भिः तद्धि तीर्थं प्रचक्षते ॥

—*Kumārasambhava*, VI-56

over the places of the activities of Rāma, Kṛṣṇa and other incarnations and also of the great Ācaryas and saints. This explains why we have innumerable sacred places closely connected either with divine incarnations or with religious leaders. It is for this reason, pilgrim centres have been perennial springs of inspiration and of sentimental appeal formulating religious leanings of a community.

Further, even a cursory glance at our epics, purāṇas and other literary works reveals that the hermitages in the past served as useful educational and social institutions where the young minds, irrespective of any caste and creed mostly were trimmed so as to make them become worthy contributors of social integrity and solidarity. The sages dwelling in the hermitages were remembered by posterity for their priceless contribution to social well-becoming. In course of time the hermitages became worthy of visit either for personal elevation in moral standards, for some relief in mental agony, or for solving conflicts and struggles in society, references to which are not wanting in our literature. Such places have also become the centres of pilgrimage.

It is believed that the idol worship in our land gained more and more popularity with the rise of Mahāyāna school of Buddhism. Whatever be the reason, Kings and aristocrats deemed the construction of temples and installation of deities as acts of piety and merit. Rich grants were released for the maintenance of temples and for daily worship of the deities installed therein. With the lapse of time, the annual festivals and other celebrations became established on the lines of legendary and traditional accounts which gave the requisite fillip to spiritual awakening. Pilgrimages to those places incidentally served as a means of removing people, especially the women folk and children, out of monotonous life.

II

One such place of interest is Melkote, situated in the District of Mandya. The place is historically known throughout the length and breadth of India. It is variantly named:

Yādavagiri[2], Yāduśaila[3], Yādavādri[4], Nārāyaṇagiri[5], Nārāyaṇapura[6], Yādavabhūdhara[7], Nārāyaṇakṣetram[8], Vaikuṇṭhavardhana[9], Bhūvaikuṇṭha[10], Gomanta[11] and Yatīśaila[12]. The

---

2. निवसन्ति नरा ये वै ते नरा मुक्तिभागिनः ।
तत्रापि **यादवगिरौ** देवसंघसमाकुले ॥
नारायणं नरसखं ये पश्यन्त्यलसा अपि ।
तेषां मुक्तिः करस्था हि नात्र कार्या विचारणा ॥
Kāśīmāhātmya II-19 ; also III-12

3. स्वयं व्यक्तं महादेवं नारायणमनामयम् ।
सेवन्ते **यदुशैलाग्रे** ते नरा मुक्तिभागिनः ॥ *Ibid* III-49

4. दीप्तिमंस्ते प्रवक्ष्यामि **यादवाद्रेश्च** वैभवम् ।
अत्यद्भुतं महापुण्यं त्वमिहैकमनाश्शृणु ॥
Matsya Purāṇa, Kṣetrakhaṇda II-I ; also XI-2

5. एकयोजनमात्रेण कावेर्या उत्तरे तटे ।
नारायणगिरावेष नाम्नैवाघौघनाशने ॥
Padma Purāṇa, Māghamāhātmya IV-21 ; also V-22

6. करवीरपुरं विप्र नारायणपदाश्रयात् ।
नारायणपुरं ख्यातं भविष्यति न संशयः ॥
Matsya Purāṇa, Kṣetrakhaṇda VII.47

7. पुरा कृतयुगे विप्र पुण्या **यादवभूधरे** ।
आसीद्द्विजवरश्श्रेष्ठश्शाण्डिल्य इति विश्रुतः ॥ *Ibid,* XII-4

8-9. सुकुमार इति श्रीमान् हरिर्नारायणोऽव्ययः ।
आस्ते दयानिधिर्ब्रह्मन् क्षेत्रे **वैकुण्ठवर्धने** ॥
तत्र गत्वा जगन्नाथमाराधय विशुद्धये ।
ख्यातं **नारायणक्षेत्रमिति** वैकुण्ठवर्धनम् ॥ *Ibid,* XI-5 and 6

10. नारायणगिरिश्चैवमनादिर्न विनश्यति ।
भूवैकुण्ठमिति प्रोक्तं ममावासं परंपदम् ॥
Sāttvatasamhitā : *Bhuvanakośā* ; *Svayamvyaktasthalanirṇayapaṭala*-49

11. इतःपरं तु हे विप्रा **गोमन्तो** गिरिसत्तमः ।
यादवाद्रिरिति ख्यातो भविष्यति न संशयः ॥
Matsya Purāṇa, Kṣetrakhaṇda VI 28 b and 29 b

place has been reckoned along with other well-known centres[13] of Śrivaiṣṇava affiliations.

The place was closely associated with Yādava kings of the hoary past and later with the rulers of Mysore belonging to Yaduvamśa only. Hyder and Tippu[14] it is learnt, have also granted profusely to the temples there. It should be remembered in this context that the 'Crown of Diamonds' was being guarded till recently in a separate apartment in the palace of Mysore and it was being sent under protective force to Melkote on the day of the celebration. Melkote, further, has been a place of attraction due to some archaeological interest it has commanded through the temples and other structures of Hoysala style. The traditional accounts available through religious[15] and literary compositions[16]

---

12. कलौयुगे तु संप्राप्ते यतिना पूजितस्ततः ।
यतिशैलमिति प्रोक्तं नामधेयान्तरं स्मृतम् ॥
Sāttvata samhitā : *Bhuvanakośa*, *Svayamvyakta-sthalanirnaya* 47 b and 48 a

13. श्रीरङ्गं वेंकटाद्रिश्च हस्तिशैलस्त्वनन्तरम् ।
ततो नारायणाद्रिश्च मम धाम चतुर्विधम् ॥ *Ibid*-33

14. Writings found on the huge drum and the bell at Yogānarasimha temple testify.

15. तन्निशम्य स भूपालस्सन्तुष्टो विष्णुवर्धनः ।
तद्वनंच्छेदयित्वाशु सम्यङ्मार्गं विधाय च ।
प्रतस्थे गुरुणा सार्धं यादवाद्रिं महात्मना ॥ *Prapannāmṛta* 43-7

16. i. Rāmanuja Campū, Madras Govt. Oriental MS series-6 *Sarasvati Nilaya*, *Madras* 1877
ii. Yatirāja Carita Campū of Ahobilasūrin. *O. R. I. Mysore*, No. 143
iii. Yādava Śekhara Campū of Bhāṣyakāra Sudhi. A 3,700 *O. R. I. Mysore*
iv. Yaduśaila Campū of Jaggu Singarārya. *B.B.D. Press*, 1934
v. Vajramukuṭivilasa Campū of Alasingabhatta. *Sanskrit College Library*, *Melkote* MSL No. 242-3

also associate the temple with Viṣṇuvardhana[17], who is said to have renovated the shrine at the instance of Rāmānuja. The region acquired greater importance with the movement of Rāmānuja from the South to Melkote to save himself against religious persecution of a fanatic Śaivite King Kṛmikaṇṭha.

The fore-head marks of the Śrivaiṣṇavites are referred to in the Purāṇas as prepared out of white clay being brought by Garuḍa from Śvetadvīpa at the bidding of Nārāyaṇa Himself.[18] It is believed that the persons wearing the mark would redeem themselves of re-birth.[19]

Melkote abounds in ponds and among them eight[20] are considered most sacred having been associated with the sages

---

17. His rule was between 1108-52.
Dr. Sūryanātha Kāmat, *Karnatakada Samkṣipta Itihāsa*, P-120, *BAPCO Publication* 1976

18. यस्मादानीयतां क्षिप्रं गत्वा तु क्षीरसागरम् ।
श्वेतद्वीपमृदं चैव कल्पपादपसञ्चयम् ॥
Matsya Purāṇa, Kṣetrakhaṇḍa VI 23a, 24a

19. अनायासेन मुक्ताश्च भविष्यन्ति न संशयः ।
श्वेतमृद्धारणेनैव यत्र कुत्र स्थिता द्विजा ॥ *Ibid*, VI-38

20. i. *Vaikuṇṭhagangā*—
सा हि **वैकुण्ठगङ्गेति** धारा तत्र निगद्यते ।
भक्तिसारो महायोगी मत्पदैकस्तुतव्रतः ।
तत्रत्यो मत्पदं ध्यायन् चिरं वैकुण्ठमाप सः ॥
Matsya Purāṇa, Kṣetrakhaṇḍa 79 and 80a

ii. *Nārāyaṇahrada*—
शरणं प्राप्य तत्रैव जगाम परमं पदम् ।
नारायणह्रदस्नानं नरकाङ्गारनाशनम् ॥ *Ibid*, 85

iii. *Maitreya*—
मन्नियोगेन मद्भक्तः पुरा तत्र पराशरः ।
पुराणं वैष्णवं चक्रे तटे तीर्थस्य तस्य हि ॥ *Ibid*, 87b and 88a

iv. *Yādavatīrtha*—
परीता यज्ञवृक्षैश्च **यादवीति महानदी** ।
ये यजन्ति परं धाम लभन्ते ते हि मामकम् ॥ *Ibid*, 90a and 91a

engaged either in the performance of penance or involved in the expiation of curse. The famous pond, Kalyāṇī is attributed with sanctification par excellence.[21] A dip therein, it is fervently believed, would expunge the sinners from their sin and legends of Satyakāma and Medhātithi in the Matsyapurāna and of Sucarita in the Nāradīyapurāṇa substantiate the belief. Praṇīdhāna Śilā located to the south of Yādavatirtha is considered holy for the reason of its association with Dattātreya.[22] Even now the practice is that a person becoming initiated into sannyāsa has to wear the Kāṣāya there only. Nārāyanakṣetram popularly called Nayanākṣetram is another place of interest, for a cave temple is found therein. There is an age-old pippla tree on the southern

---

v. *Vedapuṣkariṇī*—

वेदानुपादिशं तत्र शिष्याणामहमर्थतः ।
तस्मात् पुष्करिणीं तत्र **वेदपुष्करिणीं** जगुः ॥ *Ibid*, 98b and 99a

vi. *Darbhatīrtha*—

दर्भतीर्थमिति ख्यातं तीर्थमस्ति महत्तरम् ।
मम सन्यासिरूपस्य यत्रासीद्धर्भसंग्रहः ।
शाण्डिल्योऽपि मुनिश्रेष्ठः तत्र मामर्चयत्पुरा ॥
Ibid, 100 and 101a

vii. *Palāśatirtha*—

पलाशतीर्थमित्याहुर्यस्य नाम पुराविदः ।
विश्वामित्रेण शप्तानां वसिष्ठकुलजन्मनाम् ॥ *Ibid*, 104 and 105a

viii. *Padmatirtha*—

यत्रासीन्मत्प्रसादेन पुरा शापविमोक्षणम् ।
पद्मतीर्थमिति ख्यातं तीर्थं पद्मोपलालितम् ॥
सनत्कुमारो मुनिभिस्सनकाद्यैस्समन्वितः ।
यत्र पद्ममुपादाय पुरा मामभ्यपूजयत् ॥ *Ibid*, 106 and 107a

21. पुष्करे न तथा प्रीतिर्न गङ्गायां न यामुने ।
यथा **कल्याणतीर्थस्य** तीर्थे कल्याणचेतसाम् ॥
Nārada Purāṇa, Jñānakhaṇḍa I-42-43

22. त्रिदण्डधारी भूत्वाहं निराख्यमहमीदृशान् ।
दत्तात्रेयस्य मे तत्र तदा काषायसङ्ग्रहः ॥ *Ibid*, I-96

bank of Kalyāṇī and it is held that it bestows all the desires on the person going around it or clasping it.[23]

The place has been a source of attraction for another reason. Annual celebration of 'Vairamuḍi Utsava' believed to have commenced during Kṛtayuga by Brahma, has been of great interest. The pompous and sophisticated way in which the ten-day celebrations are performed, has been even now attracting a huge crowd every year. The 'Crown of Diamonds'[24], that Garuḍa brought back from Balin who had taken it away to his place at the instance of Nārada, is referred to as having adorned the head of Kṛṣṇa who resorted to Gomanta for a while. The day of the annual celebration[25] is fixed as early as Kṛtayuga. The idol of 'Sampatkumāra' whose head the crown decorates, has got the unique status of being the family property of the Ikṣvākus[26], a favourite deity of Rāma[27] and his descendants[28], and subse-

---

23. पिप्पलो नाम वृक्षेन्द्रः श्वेतद्वीपस्थितः पुरा ।
तं दृष्ट्वा मुच्यते पापैः स्पृष्ट्वा लक्ष्मीमवाप्नुयात् ।
ज्ञानवांस्यात्तदाश्लिष्य विद्यावांस्तु प्रदक्षिणात् ॥
Matsya Purāṇā, Kṣetrakhaṇḍa VIII-27b, 28b and 29a

24. इन्द्रनीलसहस्राढ्यं गोमेधकशताञ्चितम् ।
पद्मरागमहानीलमुक्ताजालविराजितम् ।
पुष्यरागप्रवालाढ्यं दिव्यकाञ्चननिर्मितम् ॥
Matsya Purāṇa, Kṣetrakhaṇḍa, V-50b and 51

25. फाल्गुणस्यामले पक्षे नवम्यामथ कर्कटे ।
आरभन्नुत्सवं ब्रह्मा दशरात्रं समागताः ॥ *Ibid,* VII-33

26. विष्णोराराधनार्थाय प्रतिमा दीयतां शुभा ।
तां ददामि महायोगिन्मम प्राणप्रियङ्कराम् ।
इत्युक्त्वा सुकुमाराख्यां प्रतिमां सुन्दराकृतिम् ॥
Matsya Purāṇa, Kṣetrakhaṇḍa, XII-22a and 24

27. सिषेवे रघुनाथस्तां मूर्तिर्विष्णोर्मुदान्वितः ।
साकं लक्ष्म्या च भूम्या च साकेतकुलदैवतम् ॥
Nārada Purāṇa, Jñānakhaṇḍa, VI-38

28. ततः कुशोऽपि तद्राजा राघवेण समर्चितम् ।
रूपमभ्यर्थयामास पित्र्यं धनमिति स्मरन् ॥ *Ibid,* VI-41

quently of the Yādava king Yaduśekhara, who married Kanakamālikā, daughter of Kuśa who gave the idol as a bridal gift,[29] at her request.

The *Vajramakutivilāsa Campū* has faithfully followed the traditional accounts cited above in all the narrative details. The Campū has provided a pleasing frame-work to the dry account of the Purāṇas and local chronicles about the place and celebrations, making the gods led by Indra alight by the aerial car on the place, having been invoked by the priest of the temple on the first day of the celebration through 'Bherītāḍanaṁ'[30] an initial ritual for the ten-day celebrations. They choose to stay on there only till the last day when 'Avabhṛtāsnāna', more popularly called, 'Tīrthavāri' takes place at the sacred pond Kalyāṇī. Explanation for the questions put by curious Indra as to why there is no place for Godā,[31] one of the spouses of Nārāyaṇa, details regarding the sacred ponds and their significance, about the hillock where Lord Nṛsimha is installed, the theft of 'Vairamudi' by Virocana, why as a matter of fact a running commentary of the entire celebrations we find being offered by no less a sage than Nārada himself, a champion of Sāttvatāgama lore. The author too being a priest himself has covered all the details of the performance of celebrations. No

---

29. अयाचत सा पुत्री पितरं प्रीतमानसा ।
अर्चितं रघुनाथेन रम्यं किमपि तद्धनम् ॥
जनकश्च ततस्तस्या जानकीवचनं स्मरन् ।
दिदेश दिव्यां तां मूर्तिं दिनकृद्वंशवर्धनः ॥
Nārada Purāṇa, Jñānakhaṇḍa, VI-74-75

30. कृतयुग विळम्बि हेविळम्बि शरन्मीनशुक्लसप्तम्यां प्रदोषसमये जयभेरीताडनपूर्वकं . . . समाहूताः . . . नित्यसूरयः etc.

31. इन्द्रः—कुतस्तस्याः स्थाने मुनिरयं स्थापितः ?
नारदः—प्रसिद्धा खलु यतीश्वरभगिनी गोदादेवी। पुरात्र जीर्णोद्धारकाले तस्याः प्रतिष्ठां चिकीर्षुणा भाष्यकारेण . . . तावन्माकुरु मत्सपत्नीप्रतिष्ठाम् । मदंशभूतायास्तस्याः सर्वं ममैवाचरेति जगज्जनन्या स्वप्ने समाज्ञप्तेन etc.
Vajramakutivilāsa Campū pp. 19-20

wonder, the composition is significantly named by the author as 'Viṣṇuyāgam'. The actual day[32] of its commencement is recorded along with the date[33] of the composition of the Campū.

The work has presented in a graphic manner along with the details of celebrations, certain other situations which have found no place in the Purāṇas cited above. Indra's curiosity to know how the deity was found out, becomes satisfied by Nārada. He says that Rāmānuja when arrived at the region, was bidden by the Lord Himself in a dream to restore Him from the ant-hill[34] grown around. Accordingly he restored and installed him in the place where the temple is seen now. The event is commemorated by a celebration.[35] Rāmānuja is considered to be the incarnation of Ādiśesa born on the mortal region at the behest of the Lord.[36] Viśṇuvardhana[37] is referred to. There is a reference to the princess of Muslim king[38] ruling over Delhi. Indra's reference to a section of community pañcamas, pulling the chariot, finds

---

32. शरन्मीनशुक्लसप्तम्यां प्रदोषसमये जयभेरीताडनपूर्वकं . . . भगवतानुज्ञापिता बभूवुः। *Ibid*, P. 2

33. कलौ वर्षसहस्राणां द्विषष्टिन्यूनपञ्चके।
गते कृतिरियं जज्ञे योगानन्दात्मजात्कवेः॥ *Ibid*, 7, P. 2

34. पुरा भाष्यकारेण क्षीरधाराभिर्वल्मीके विशकलीकृते etc.
Vajramakutīvilāsa Campū P. 12

35. पदात्पदान्तरं चलितुमप्यशक्तो मनसैव देवं विचिन्यन् वात्सल्यातिशयेन स्वप्ने प्रसन्नं परवासुदेवरूपं संपत्कुमारमनुभूय परेद्युः यादवाचलमासाद्य प्रत्यक्षेणानुभवितुं पुनरुत्सवमारचय्य . . . परमपदनाथमत्र प्रतिष्ठापयामास। *Ibid*, Pp. 17-18

36. पुराकिल कलिवर्षप्रादुर्भावमहिमसञ्जनितपाषण्ड . . . द्विजवर्णानां श्रुतिमधुरस्वराकर्णनान्तराये सञ्जनिते तदुत्सारणाय . . . कृतावतरणं फणाभद्रमाणं etc. *Ibid*, P. 22

37. अहमपि एनं मूले कृत्वा . . . लोकातिशायिनस्तस्य लाभसन्तुष्टं विष्णुवर्धनाख्यं नरेन्द्रं संप्राप्य तेन साकं गिरिमधिरूढे। etc. *Ibid*, P. 23

38. (i) स्वजनकडिल्लीश्वरनगरोपकण्ठवर्ती . . . निजसंनिधिनिरन्तरकृतवासया यवनेश्वरात्मजया महालक्ष्म्यालंकृतेन। *Ibid*, P. 11

condemnation at the hands of Nārada who asks him to refer to them by the name 'Śrīkuladāsa,[39] a name given to them by Rāmānuja himself, a great social reformer of the time. Śrikuladāsas participate even now in the celebration on the last two days, without any reservation, enjoying the privilege of taking the idol on their shoulders in a palanquin. The Campū as other literary works based on Rāmānuja[40] and Yādavagiri,[41] has been a faithful record of historic incidents that occurred during the period of Rāmānuja. The importance of this Campū, in short, lies in lending a colour of historicity to the otherwise conventional and legendary narration of the celebrations as found in some of the Campūs[42] belonging to the class.

---

39. न पञ्चमा इति वक्तव्यम्। प्रथमादप्यधिका इमे भगवत्किङ्करा श्रीकुलदासा इति वक्तव्यम्। *Ibid*, P. 77

40. यवनेश्वरतनया किं पदाब्जभवं विहाय ह्यधिशेते। *Ibid*, P. 29-89a

41. (a) *Rāmanuja Campū* of Rāmanujācārya
    (b) *Yatirājacarita Campū* of Ahobila Swamin
    (c) *Yaduśaila Campū* of Jaggu Singra Iyengar
    (d) *Bibināccyār* a play in Kannada written by Sri Narasimhācārya P. T. describing the celebration of marriage between Lord Sampatkumāra and the princess.

42. (i) *The Kārthikotsava Dīpikā* of Kavigaṇḍabheruṇḍa Kṛṣṇārya.
    Maharaja Sanskrit College Library, Mysore No. 3571
    (ii) *The Brahmotsava Dīpikā* of Śrīnivāsacārya.
    (iii) *The Velā Purīya Keśavotsavamālikā* of Srikṛṣṇā.
    (iv) *Śrī Rāma Campū Prabandha* of Ramaswami
    —*Star of India, Mauras, 1904*
    (v) *Śrī Prasannarāmāprameya Mahotsava Campū* of Sundaravallī
    Maharaja Sanskrit College Library No. 8770
    (vi) *The Vajramakuṭī Mahotsava Varnana Campū* of Belur Kṛṣṇa Iyyengar
    —*Palace Sarasvati Bhaṇḍāra, Mysore, A 748*

In the midst of several other incidents,[43] the theft of 'Vajramakuṭi' by Virocana[44] finds an elaborate treatment[45] in the Campū. Virocana who is represented as having no reverence to his father and deeds,[46] consults his ministers for taking revenge on the Lord Viṣṇu. A decision is taken to rob the Lord Viṣṇu (reposing in Śvetadvīpa) of the crown; he sets out to Śvetadvīpa, disguising himself as a Srīvaiṣṇava devotee. His activities are in no way different from those of the genuine ones. At last, the crown becomes successfully taken away by Virocana to the nether world. A special box is prepared by Maya to preserve the crown.

Next day confusion prevails in Śvetadvīpa over the disappearance of the crown from the person of the Lord. Then starts the enquiry revealing the author's knowledge of the process of investigation. Viṣvaksena, the traditional commander-in-chief of Viṣnu holds the enquiry. The very spouses of the Lord, Lakṣmī and Bhūdevī known for their mutual rivaly are also not beyond suspicion. How the wives of a being, complain against one another hurling vituperation before an investigating officer

---

(vii) *The Japyeśotsava Campū* of Venkatasubba Kavi
O. R. I., Mysore, KA 783

(viii) *The Kumbhābhiṣeka Campū* of Mandikal Rāma Śāstri
Vanivilāsa Press, Śriranga 1917

43. (i) The utsava of 'Daśāvatāra' usually celebrated on the day of 'Rāmānuja Jayanthi', finds mention here as a part of the celebration.

(ii) The accounts of Campakamuni pp. 22-23

(iii) Of Tolappacārya p. 17 (iv) Of Bilasvarga p. 33

44. Bali is stated to have brought the crown of diamonds from 'Kṣīra Sāgarā' at the bidding of Nārada.
—*Matsya Purāṇa, Kṣetrakhaṇḍa,* V. 30-31

45. *Vajramakuṭīvilāsa Campū* pp. 36-58.

46. तथापि मदीयतातपातकेन पैतामहं यशः प्रणाशितं किल etc.
Ibid pp. 37-38

on such occasions, has been brought out through Lakṣmī[47] and Bhūmī[48] in the light of mythological allusions. Viṣvaksena feeling depressed over their indifference to common interest next enquires Adiśeṣa[49] and Garuḍa[50] whose attitude towards one another was in no way different from the spouses of Lord Viṣṇu. These two legendary hostiles are represented as associated with the Lord to symbolise the unification of hostiles in Him. But contrary is their behaviour in the context. That an officer holding the enquiry should never lose patience, is brought out well in Viṣvaksena's appeal[51] to Ādiśeṣa, when the latter began to throw the blame on the former himself.[52] The enquiry of the personal retinues of the Lord being over, the other devotees are enquired. They are threatened also of the 'third degree measures'.[53] The innocent devotees begin to blame their lot for having stayed on there. When all ordinary attempts, astrologer as would be the practice even now with some people, is consulted.

---

47. एवं भूषणजालं चौर्यानीतं स्वधापरैर्वापि ।
गर्भे निगूह्य सैषा भजते कीर्तिं हि रत्नगर्भेति ॥ *Ibid*, 135 p. 47

48. निक्षिप्तं वज्रमकुटं तथा निजजनकेऽस्मिन् पारावरे । यतः चौर्याहृतं स्वपुत्र्या कुक्षौ धर्तुं किरीटमर्होऽयं । जनको ममैष भर्तुश्चरणो मकुटं तु धर्तुं उचितः । *Ibid*, 136 p. 48

49. सततं हरिसंश्लेषं भजतो भाग्यं ममायमसहिष्णुः ।
आरोपयितुं चौर्यं मयि मकुटीमचूचुरद्गरुडः ॥ *Ibid*, 143 p. 50

50. निजभोगलालसोऽयं विषमहितत्वाद्भयङ्करो नृणाम् ।
अपि च द्विजजिह्मनाथः को जानीते तदीयदुश्चर्याम् ॥ *Ibid*, 137 p. 49

51. किं आवयोरन्योन्य मनस्तापेन । कुत्र भवतस्संशयः कथनीयः ।
Ibid, p. 49

52. त्वत्साहाय्यं विना को मकुटमपहरेत्तादृशः कोऽत्र धीरः ॥
Ibid, 142a p. 49

53. समानीयन्तां बहुसारावेत्रभाराः । सज्जीक्रियन्तां शृङ्खलानिवहाः । संगृह्यन्तां शाणोल्लीढानि शूलानि ... संपाद्यन्तां नासाभेदछुरिकाः । ... सन्तप्यन्तामयः-पिण्डनिचयाः etc. *Ibid*, p. 50

That astrologer is no other than Bṛhaspati, preceptor of gods who offers a clue regarding the thief.[54]

Then Garuḍa is bidden to fetch the thief along with the stolen crown. He, having gone there breaks open the box in which the crown had been kept and in the course of bringing the crown, a fierce fight ensues between him and the demon forces. Garuḍa succeeds not only in vanquishing them but also in taking back the crown. On the way back to Śvetadvīpa, he hears an incorporeal voice directing him to adorn the head of Kṛśṇa resting on Gomanta,[55] with the crown.

The Campū in common with other Campūs of the class has recorded the behaviour[56] and beliefs[57] of people on such occasions. The special practice[58] of the Śrivaiṣṇavas during the Lord's procession finds a mention. The Campū while registering the poet's appreciation of Varavaramuni, a commentator on Divyaprabhandham, scoffs at the two main sects of Śrivaiṣṇva viz. 'Vadagalai and Tengalai' who fanatic as some of them are, fight among themselves even while serving the Lord. It is

---

54. सर्वमिदमासुरीकृत्यमिति प्रतिभाति। *Ibid*, p. 51

55. उत्सृज्य नागभोगं क्षीरार्णवतोऽहमागतो मधुराम्।
अद्यास्ति पर्वतेऽस्मिन् वीरोऽसि खग प्रयच्छ मकुटं मे ॥
Ibid, 170 p. 57

56. (i) श्रुत्वा घण्टानिनादं धावन्तोऽद्योपयान्ति कुत एते।
कटिवेष्टितोत्तरीयास्साञ्जलिबन्धास्तुतीः प्रकुर्वाणाः ॥
Ibid, 92 p. 29

(ii) यदत्र बहवो बाहुमुद्यम्य वयं बदरिकाश्रमनिवासिनो, वयं श्रीरङ्गादागताः... वयं दरिद्राः... भगवन्निवेदितं दातव्यमिति मुखरयन्ति भगवन्मन्दिरम्। etc. *Ibtd*, p. 64

57. (i) सेयं पुत्रलाभायैवं सेवां करिष्यामीति पूर्वं प्रार्थितवती तल्लाभसन्तुष्टाधुना नृसिंहं सेवितुमायाति। *Ibid*, p. 31

(ii) त इमे प्राप्तारोग्या भगवत्सेवां कुर्वन्ति। *Ibid*, p. 31

58. प्रबन्धाध्येतारः पुरत एवागच्छन्ति। वेदपाठकास्तु पश्चाद्भागे।
Ibid, p. 33

significant that no judgement over the feud is recorded in the Campū. The Campū comes to close with Phalaśruti a conventional practice.

The Campū is not divided into chapters as many Campūs have been. The Campū is of narrative interest only and hence has not displayed the poet's literary abilily, which is revealed only while offering interpretative description of the processions major and minor as well. Of the figures of speech used in the Campū, Utprekṣā and Atiśayokti are the foremost. Play on words[59], alliteration[60] etc. as could be found in other Campūs, are also found here. The poet's sense of humour[61] and satirical vein[62] are revēaled here and there. Adages[63] are also presented. Conversational style that is adopted for narration has lent a pleasing colour to the otherwise dry presentation of the celebrations.

III

Alasingabhaṭṭa hailed from a scholarly family of great repute in priesthood. He belonged to the family of Śrīrangarājabhaṭṭa, one of the two priests established by Rāmānuja in Melkote, having brought them from Śriranga with him. The lineage it is held, was also known as 'Varam tarum vāmanar'. Alasingabhaṭṭa's father was Yogānanda who, it is said, was a confidant of Kṛṣṇarāja Wodeyar III, the then ruler of Mysore during 1779-1831 A.D. Yogānanda, it is learnt, installed the idol of Kṛṣṇa in the Palace of Mysore and was popularly known as 'Todābhaṭṭar'. He belonged to Maunjāyanagotra, Kātsyāyana sūtra and Śuklayajurveda.

There are some anecdotes regarding the birth and spiritual accomplishment of Alasingabhaṭṭa. It is said that Yogānanda

---

59. *Ibid,* 12 p. 4
60. *Ibid,* 17: 19 p. 5; 27 p. 9; 65 p. 22
61. *Ibid,* p. 31
62. *Ibid,* 193 p. 62
63. (i) Śunaḥ santādanāya citradaṇḍānveṣanam
    (ii) Kim mūṣaka samhārāya mṛgādhipagamanam

did not have any progeny for a long time. Once some marvadi came from North and requested him to teach 'जितं ते' stotram, normally recited by the priest after 'śayyāsana' upacāra is offered in the temple. Yogānanda, it appears, refused to do the same on the ground that it was expected to be instructed only to persons born in an 'arcak' family. The 'Marvādi' having known the reluctance of Yogānanda, committed suicide jumping to a pond nearby with a resolve that he should be born of him only. Then was Alasingabhaṭṭa born, it is believed.

Kṛṣṇaraja Wodeyar III it appears, wanted to test Alasingabhaṭṭa's spiritual attainment and hence once provoked him by referring to the deity worshipped by him as made of stone. Alasingabhaṭṭa stood the test by presenting 'Mangalārati' well-lit near the face of the idol! Lo! a deep breath emerging through the nose region of the idol could be felt by the king!

Alasingabhaṭṭa was the recipient of Palanquins presented by the ruler as a token of appreciation of his merits as the 'sanad'[64] available with the present 'arcak' of the temple reveals.

His period[65] was in the latter half of the eighteenth and the early part of the nineteenth century A.D. He had only one daughter who became married to one Tambirāja Bhattar. Their adopted son was Pārthasārathi Bhaṭṭa.[66] Alasingabhaṭṭa installed an idol of sage śāṇḍilya in a place attached to his residence located

---

64. See the sanad on page xxiv.

65. शालिवाहशकाब्दानां सार्धं सप्तशते गते सहस्रे नन्दने वर्षे कन्याराशिगतौ रवौ स्वतातपादजन्मर्क्षे श्रविष्ठाख्ये शुभे दिने अशेषविदुषां गीष्ठीमध्ये संपत्सुताग्रतः श्रीभाष्यकारपदाब्जे नुतिरेषा समर्पिता। This is with reference to his 'यतिराजशतकं' and its commentary. Also see Vajramakuṭīvilāsa Campū 7 p. 2.

66. He was an 'arcak' in the main temple at Melkote for a long time. Later he relinquished the service and had settled in Bangalore with his family. His eldest son, a class-fellow of the publisher of this text, is presently employed in the Geological Survey of India at Bangalore.

near the temple. He was an ardent devotee of 'Viśvatrātā' Lord Narasimha as his commentary on Nṛsimhakalpa in the sāttvata samhitā and also benedictory verse[67] reveal. He is said to have held a strong conviction that the differences of the two fighting sects 'Tengalai and Vadagalai' could be squared up.

He inherited scholarship of the lineage, having been initiated into Āgama lore by his father. He studied the traditional religious texts under the tutelage of Tondanur Prativādibhayankaram Singriengar. Mahābhāṣyam Singlachar, Sampatkumāra Swamin and Kode Shamanna[68] were his close associates during 'Śribhāṣya kālakṣepam'.

His works

1. Vajramakuṭī Vilāsa Campū
2. Sāṭṭvata Samhita Bhāṣya[69]
3. Sāttvatāmṛtasāra[70]
4. Sāttvatāmṛta
5. Yatirāja śatakam and a commentary on it
6. Rāmānujaniyamanappaḍi
7. Odeyavar tiruvārādhanakramaḥ
8. Puccha Brahma Vādānirāsaḥ
9. Ānandatāratamyavicāraḥ
10. Pañcarātraprayogah
11. Sampradāya dipikā and
12. Īśvaratantra Bhāṣya

---

67. Vajramakutivilāsa Campū 1 p. 1.
68. The Publisher's great-grandfather.
69. The copies of the Bhāṣya were sent to the priests of temples located at Kalalai, Hemmaragal, Seringapattam. It appears the authorities of Madras University Library procured a copy of the same available in Belur. One copy is available with Sampatkumara Bhaṭṭacārya who was kind enough to allow this publisher to copy the same.
70. The work is believed to have been from the pen of Yogānanda, father of Alasingabhaṭṭa.

Palace
Seal

चामराज वडेयर् तनूज कृष्णराज वडेयर्

ಕೃಷ್ಣರಾಜ ವಡೆಯರವರು ವಿರೋಧಿ ಸಂವತ್ಸರದ ವೈಶಾಖ ಶುಕ್ಲ ಬುಧವಾರದಲ್ಲೂ ಶ್ರೀಮಾನ್ ಮೇಲುಗೋಟೆ ದೇವಸ್ಥಾನದ ಪಾರುಪತ್ಯಗಾರ ವೇ|| ಸಮುಖದ ಗುಂಜಾ ಜೋಯಿಸರಿಗೆ ಬರಸಿ ಕಳುಹಿದ ನಿರೂಪ

ಅದಾಗಿ ಮೇಲುಕೋಟೆ ಯೋಗಾನಂದಭಟ್ಟರ ಮಕ್ಕಳು ವೇ|| ಅಳಶಿಂಗಭಟ್ಟರಿಗೆ ಶ್ರೀ ಶಠಕೋಪ ಮರ್ಯಾದೆ ನಡೆಸುವ ಬಗ್ಗೆ ಈ ಶುದ್ಧ 9 ತಾ|| ನಲ್ಲಿ ಸನ್ನದು ಅಪ್ಪಣೆ ಕೊಡಿಸಿರುವುದು ಸರಿಯಷ್ಟೆ. ಅದೇ ಮೇರೆ ಶ್ರೀ ಶಠಗೋಪ ಮರ್ಯಾದೆಯನ್ನು ಇವರು ಪರಸ್ಥಳದಿಂದ ಬಂದು ಆಗಬೇಕೆಂದು ಹೇಳಿದಲ್ಲಿ ನಡೆಸುತ್ತಾ ಬರುವುದು. ಇದು ಹೊರತು ದೇವಸ್ಥಾನದಲ್ಲಿ ಸದರಿ ಅಳಶಿಂಗಭಟ್ಟರಿಗೆ ಕಡಾಂಬಿ ಐಯ್ಯಂಗಾರ್ಯರ ಮೇರೆಗೆ ಪರಿವಟ್ಟ, ತಿರುಮಾಲೆ, ಅರಳುಪ್ಪಾಡು, ತೀರ್ಥಪ್ರಸಾದ, ವಿನಿಯೋಗ, ಎಲೆ ಅಡಿಕೆ ಮುಂತಾದ ಆಚಾರ್ಯಪುರುಷರ ಕಟ್ಲೆ ಮರ್ಯಾದೆಯನ್ನು ಸದರಿ ಕಡಾಂಬಿ ಐಯ್ಯಂಗಾರ್ಯರಿಗೆ ಆದಮೇಲೆ ನಡೆಶಿಕೊಂಡು ಬರುವುದು. ಇದು ಹೊರ್ತು ಕೃಷ್ಣರಾಜ ತಿರುನಾಳು ಉತ್ಸವದಲ್ಲಿ ಶ್ರೀರಂಗಾಚಾರ್ಯರು ಶ್ರೀನಿವಾಸಾಚಾರ್ಯರಿಗೆ ನಡೆಯುವ ಮೇರೆ ಇವರಿಗೂ ಪದಾರ್ಥವನ್ನು ಪರಸ್ಥಳದ ಬ್ರಾಹ್ಮಣರ ಐವೇಜಿನಲ್ಲಿ ಮೂನಾಸಬೂಬು ನೋಡಿ ತಕ್ಕಷ್ಟು ನಡೆಶಿಕೊಂಡು ಬರುವುದು.

ತಾ|| 13ನೇ ಮೇ ಮಾಹೆ
ಸನ್ 1829 ಇಸವಿ ಖತ್ತು.

ಅರಮನೆ ಸುಬ್ಬರಾಯ
ಮುನ್ಸಿ ಹುಜೂರು, ಮಹೀಶೂರು ಶೀಮೆ

॥ श्रीः ॥

॥ श्रियै नमः ॥

॥ श्री योगानन्दपरब्रह्मणे नमः ॥

वज्रमकुटीविलासचम्पूः

श्रीमद्यादवशैलाग्रशेखरं सद्गुणाकरम् ।
योगानन्दनृसिंहाख्यदैवतं पर्युपास्महे ॥ १ ॥

श्रीमान्यः पञ्चरात्रं विशदमुपदिशन् स्वात्मजाय प्रसन्न-
स्तेन स्वाधीनवाचा ह्यनयत चतुरास्येन शास्त्रप्रसिद्धिम्[1] ।
सर्वाभीष्टप्रदात्रीं मुहुरिह कलयन्दासवर्गे स दीक्षां
योगानन्दाभिधानः कलयतु कुशलं देवदेवो गुरुर्वः[2] ॥ २ ॥

श्रीमान्हिरण्यमिह पुण्यजनैकसेव्यं
प्रह्लादहेतुमपि यस्तु तृणाय मेने ।
अर्च्योऽथवार्चक इहावतु नस्सयोगा-
नन्दाख्यदेशिकमणिर्यदुशैलदीपः ॥ ३ ॥

तत्सूनुरळशिङ्गाख्यभट्टोऽयं कविकेसरी ।
विधत्ते वज्रमकुटीविलासं चम्पुमुत्तमम् ॥ ४ ॥

यदुक्ष्माभृन्नाथस्तवनविषयाश्चारुकृतयः
सहस्रं विद्यन्ते त्वमपि किमिहायास्यसि[3] वृथा ।
इति त्वं मावोचस्सरसिज[4]भवाद्यर्चितपदो
रमानाथस्सोऽयं त्विति कविरसौ नार्चतु किमु ॥ ५ ॥

---

1. चतुरास्यशास्त्रं प्रसिद्धम् (क) 2. गुरुत्वात् (ख)
3. यासयसि (क) 4. सरसिजपदाद्यर्चित (ख)

इतिहासपुराणकीर्तिता[1]र्थान्बहवः कथयन्ति चम्पुकाव्यैः ।
अहमत्र तु पञ्चरात्रशास्त्रे[2] ग्रथितं कथयामि विष्णुयागम् ॥ ६ ॥

कलेर्वर्षसहस्राणां द्विषष्टिन्यूनपञ्चके ।
गते कृतिरियं जज्ञे योगानन्दात्मजात्कवेः ॥ ७ ॥

अस्ति प्रशस्तमहिमा यदुभूधरेन्द्रः
स्वस्तिप्रदो निजपदाश्रित[3]मानवेभ्यः ।
यस्तिग्मरश्मिशतसन्निभवज्रमौलि-
स्वस्तिष्ठ[4]तामपि सुविस्मयकृद्विभाति ॥ ८ ॥

तस्य खलु कवलभवभवनमङ्गळदीपस्य कनकमालिकाकरकिसलयोपलालितचरणराजीवस्य, कंसदमनार्पितकनद्वज्रमकुटालङ्कृतस्य, यवनेश्वरतनयाप्राणवल्लभस्य यदुगिरीश्वरस्य यतिराजसम्पत्कुमारस्य महोत्सवसेवार्थमनेककविकेसरिणा निरंतरनिजहृदयगुहाविहरमाणविश्वत्रातृनृकेसरिणा निरवद्यसुविद्यहृद्यपद्यशतसंस्तुतश्रीभाष्यकारेण श्रीसात्वततन्त्रभाष्यकारेण मौञ्ज्यायनकुलकलशजलनिधिसुधाकरनिजतातपादसमध्यापितभगवच्छास्त्रस्वतन्त्रेण व्याख्यातेश्वरतन्त्रेण निर्हेतुकभगवदनुग्रहपरिपूर्यमाणनिजकांक्षितेन अळशिङ्गभट्टर्दीक्षितेन कृतयुगविळम्बिहेविळम्बिशरन्मीन[5]शुक्लसप्तम्यां प्रदोषसमये जयभेरीताडनपूर्वकं दिव्याभिर्गाधाभिर्यथाक्रमं समाहूतास्सुदर्शनपाञ्चजन्यादयो[6]ऽस्त्रनायकाश्शेषशेषाशनादयो नित्यसूरयः कुमुदकुमुदाक्षादयो गणनायकाः[7] पराङ्कुशपरकालादयो मुक्तवर्गाः शाण्डिल्यौपगायनादयो महाभागवताग्रेसराः शुकशौनकसनकसनन्दनव्यासपराशरतुम्बुरुनारदप्रह्लादविभीषणरुक्माङ्गदाम्बरीषसुग्रीवाञ्जनेयप्रभृतयो वैष्णवोत्तमाः चतुर्मुखशतमखादयो बर्हिर्मुखा अन्ये च ये ये

---

1. कीर्तितान् (ख) 2. शास्त्र (ख) 3. पदाश्रित् (ख)
4. स्वस्तिष्वतां (ख) 5. शुभकृन्मीन (ख) 6. जन्यादयास्वनायका
7. गौणनायकाः (क)

वैष्णवास्तत्तल्लोकनिवासिनः सर्वेऽपि ते सकुतूहलं सपुत्रमित्रकळत्रवाहन-परिच्छदास्सत्वरं प्रस्थाय क्षणमात्रेण यादवाचलमासाद्य तत्र वीथीषु सविलासं समायान्तं भगवन्तमिन्दिराकान्तं संसेव्य यावदुत्सवान्तं यादवाचलेऽस्मिन् वसतेति भगवतानुज्ञापिता बभूवुः ।

तत्र तदानीं तन्माहात्म्यपारावारपारदृश्वा सात्वतागमविशारदो नारदो वासवप्रभृतीन् अमरानित्थमकथयत् । भो भो देवास्सर्वेऽपि सज्जीभूता इहैवाव[1]तिष्ठध्वम् । इदानीमेव यतिराजसम्पत्कुमारश्चतुरन्तयानाद्धंसवाहन-मधिरुह्य समागमिष्यतीति । तच्छ्रुत्वा सर्वे गीर्वाणास्सङ्खशस्सङ्खशस्सज्जीभूय तदुत्सवदिदृक्षया मुहुर्मुहुरुद्भीविकामारचयन्तोऽवतस्थिरे ।

तावद्धंसाधिरूढः कनकमयवपुः शङ्खचक्राभिरामः
श्रीवत्सालङ्कृतोराः कनदतुलमणीहारकेयूरशाली ।
बिभ्राणो वैजयन्तीं जलरुहनयनः पीतवासाः किरीटी
सम्पत्सूनुः प्रतस्थे यदुधरणिधराधित्यकावीथिकासु ॥९॥

तदा पाकशासनादयो नाकवासिनस्सर्वे झटिति समुत्थाय चन्द्रमिव चकोराः, अरविन्दमिव भ्रमराः, अम्भोदमिव मयूराः सकुतूहलं पश्यन्तः साञ्जलिबन्धाः परिवार्य यतिराजसम्पत्कुमारमनुजग्मुः । तदानीं,

नारदः—

हिंसाशील[2]निशाचराधिपकुलध्वंसाय योऽवातरत्
तं साकेतगतः प्रहर्षममरोत्तंसार्पितो योऽनयत् ।
संसारार्णवतारणैकतरणिं कंसारिसंसेवितं
हंसारूढमिमं भजन्निह वरं कं साधयेन्नो जनः ॥ १० ॥

---

1. इहावतिष्ठध्वम् (ख) 2. हिंसानील (ख)

किञ्च,

पितामहो हंसवराधिरूढः
स्वभूरमोघागमभारतीड्यः ।
सन्मानसैकाभिरुचिस्स एष
पितेव मे भाति गुणैस्समस्तैः ॥ ११ ॥

पितामहे हंसवराधिरूढे
पितामहो हंसगतोऽवरूढः ।
पितामहेऽस्मिन्मम सेवयास्य
पितामहो विन्दति धन्यतायाः ॥ १२ ॥

एवं स्तुवति नारदे इन्द्रादयो लोकपाला अपि इत्थं भगवन्तं वर्णितुं उपचक्रमिरे । तथापि—

इन्द्रः—

पिता परमहं सो मे पुत्रोऽयं हंसवाहनः ।
अहं स इति मामेकं ध्यायन्नित्येष हंसभाक् ॥ १३ ॥

अग्निः—

द्विजराजो निष्कलङ्को ध्वजाग्रे राजते भृशम् ।
हरिणाधिष्ठितो हंसश्चित्रमेतद्द्वयं बुधाः ॥ १४ ॥

यमः—

द्विजराजे सुखासक्ते गतिवेगेऽपि किं फलम् ।
हंसोऽपि मन्दगमनो हरिणाधिष्ठितस्ततः ॥ १५ ॥

निर्ऋतिः—

विधुरिव हंसोपेतस्सर्वान् सर्वोत्तमश्रिया जुष्टान् ।
कलयति युक्तं विबुधैः पीतं पादामृतं तदीयं यत् ॥ १६ ॥

वरुणः—

वाताशनकृतद्वेषं सन्त्यज्य गरुडं हरिः ।
कन्दाशनप्रियं हंसं नूनमेनमुपाश्रितः ॥ १७ ॥

वायुः—

नव्याम्बुदश्यामलविग्रहोऽयं
भव्यार्थवर्षी निहतोग्रतापः[1] ।
सम्पत्सुतोऽधः कुरुते मराळं
स्थानेऽमराळी कथमद्य हृष्टा ॥ १८ ॥

कुबेरः—

भगवतः पुरुषोत्तमस्यातिपरिचयादुपेक्षा भवति । यतः

द्विजराजं परित्यज्य निजवाहं जवाधिकम् ।
अजवाहं कृतिश्लाघ्यं भजते हंसमच्युतः[2] ॥ १९ ॥

शङ्करः—

अपि सखे धनद, स्थूलदृष्ट्या पश्यसि । यदेव गरुत्मानेव भगवतः तत्तदुत्सवानुरूपाणि हंसगजरथतुरगादिनानाविधरूपान्तराणि बिभर्ति । सूक्ष्मदृष्ट्या पश्य ।

विनतानन्दनः श्रीमानहीनाभरणोज्वलः[3] ।
बृहत्पक्षो हंस एव गरुत्मानेव सर्वथा ॥ २० ॥

एवं परस्परं कथयत्सु लोकपालेषु यतिराजसम्पत्कुमारः क्षणमात्रेण सर्वासु वीथीषु परिक्रामन् श्रीपुष्टिभ्यां सह यागमन्दिरान्तः प्रविवेश । तदा सर्वे गीर्वाणा अपि विविधविततविचित्रवितानविततिसमलङ्कृतोपरिभागलम्ब-

1. हव्यार्थवर्षीति हृतो (ग्र) तापः (ख) 2. हंसमच्युतम् (ख)
3. श्रीमान् हेमाभरणोज्ज्वलः (क) 4. परिभ्रमन् (ख)

मानमुक्तासाररुचिररुचिपरम्परापुनरुक्तधवलितश्वेतचामरवज्रदर्पणसितकौशेय-कान्तिकल्लोलधवलितसमस्तवस्तुजाततया तत्तद्विजातीयवासनामात्रानुमेय-वेदिकातोरणभागसमालिप्तमृगमदघनसारकुङ्कुमरजनीपङ्कभेदां उदयगिरिवर-मकुटतटलसदरुणरुचिचयसमान[1]पटुतरविमलमणिगणखचितशुभतरभद्रवेदिका-कान्तिलहरीव्याजेन समुल्लसन्तीं सरस्वतीनदीमवलोक्य भगवदुत्सवावलोकनार्थं स्वसखीममरतरङ्गिणीमप्यानेतुमूर्ध्ववातायनमार्गेण दिवमारोहयन्त्येव कलिन्द-नन्दिन्या मधुपर्काहुतिसमयसमुज्जृम्भमाणधूमरेखया समाकलितां परितो निबद्धशुद्धमहादर्पणमण्डलेषु सुस्पष्टं प्रतिबिम्बितानां पुनर्वेदपाठकविरचित-स्फुटतरवर्णसमुच्चारणसमयसमुज्जृम्भितनिश्वासाभिभूतेषु तेषु क्षणमलक्षितानां[2] पुनरनवरतपरिचरणजनितनिरवधिसुखनिजसखसन्तोषसमवलोकनकुतूहलादिव जालकमार्गगतवातपोतसञ्चालितसितपीतादिध्वजव्रजचेलाञ्चलविशोधितेषु तेषु सन्दृश्यमानानां पुनर्होमधूममषीमलिनीकृतेषु तेष्वदृष्टानां भित्तिभागविलिखित-पद्मनाभादि भगवदवतारपुरन्दरपुरहरपुरस्सरसुरवरनिकराणां क्षणमात्रसन्दर्श-नासन्दर्शनाभ्यां दीक्षिताग्रेसरसमुच्चरितावाहन[3]विसर्जनमन्त्रमहिमनिबन्धन-तत्संनिधानासंनिधानभ्रमं जनयन्तीं बाह्याङ्गणेषु चतुर्द्वारतोरणविलसद्वन्दन-मालिकावेल्लितपल्लवतल्लजोल्लसितसम्फुल्लमल्लिकामतल्लिकाकुवलयनिचयनिर्गलद-मन्दमकरन्दबिन्दुसन्दोहास्वादलम्पटचञ्चरीकपुञ्जझङ्कारसहकृत वीणावेणुपणवा-द्यनेकवाद्यनिस्वनैरन्तः पूर्वभागे नवरत्नपूरिताब्जनाभभुवनाख्यमण्डलस्य कुरुविन्दकान्तिषु अरविन्दभ्रान्त्या, इन्द्रनीलरुचिनिचयेषु कुवलयभ्रान्त्या, हीरावलीदीप्तिपरम्परासु कुमुदकुसुमभ्रान्त्या, मरतकमणित्विषां जालेषु शैवल-भ्रान्त्या, विमलमौक्तिकमणिश्रेणिषु स्वच्छोदकभ्रान्त्या, समुदिते कान्तिनिचये सरोवरभ्रान्त्या समागतहंसपरम्परामधुरारावसम्मिलितऋक्सूक्तपठनघोषैः दक्षिणभागे उदात्तानुदात्तादिस्वरविवेचनार्थमूर्ध्वाधःप्रचलितजटापटिहस्त-निबद्धमणिघण्टाघणघणरणितद्विगुणितयजुर्घोषैः, पश्चिमभागे भगवतः सन्निधौ

1. हसन (ख) 2. क्षणलक्षितानां (ख) 3. वहन (ख)

निरवधिकभक्तिभरप्रणिपतदुडुपतिमकुटजटाजूटतटनटदमरतटिनीतुंगतरंगसंघात-सङ्घर्षणजनितझळज्झळारवविमिश्रितमूलश्रुतिघोषैः चतुर्मुखषण्मुखशतमखमुख-निखिलबर्हिर्मुख[1]मुखकमलविनिःसृतविविधनुतिविततिकलकलपरिकलितजैमिनि-सामगानैश्च, उत्तरभागे कनकमयपालिकादिपात्रशतसमङ्कुरितनानाविधौषधि-शीघ्रभाविफलसंजिघृक्षाकुतूहलसमागतशुकसारिकामधुरालापसंयुता[2]खर्वाथर्व-सूक्तपठनरावैः तुम्बुरुनारदतन्तन्यमानवीणानिनादसहकृतमृदङ्गपङ्गलनादमेदुर-विज्ञापनकरकरकमलसन्ताड्यमानकांस्यतालध्वनिरञ्जितवकुलधरमुनिवदनजल-रुहगलितशुभतरमधुरमकरन्दायमानद्रमिडागमगाधा[3]गानविशेषैश्च, मध्यभागे अनवरतसञ्चाल्यमानघण्टारवमिलितमूलमन्त्र[4]स्वाहाकारवषट्कारध्वनिभिः जीमूत-वल्लकीशङ्खमृदङ्गसदृशैः शुभसिद्धिसूचकैरग्निध्वनिभिश्च मुखरितान्तरालां भगव-दुत्सवोपयोगिविविधाभरणोद्धरणाय समुद्घाटितपिधानायाः पेटिकायाः गर्भगतेनेव कुरविंदमणिमयाभरणसंदोहेन अरविन्दवासिनीप्रभृतिमुकुन्दसुन्दरीबृन्दचरणानु-रञ्जनाय बृहद्भाण्डसम्भृतेनेव लाक्षारसेन मण्डलाद्यलङ्करणार्थं वेत्रपिटक[5] समाहृतेनेव कुसुमनिवहेन भगवदङ्गानुलेपनार्थं बृहत्पात्रसम्भृतेनेव[6] बालार्केण जालकमार्गनिर्गतनीलधूमरेखास्वभिनववारिवाहमोहेन प्रावृट्समयमुपस्थितं मत्त्वा तदुद्गममूलावलोकनार्थमेकत्रपुञ्जीभूतेनेव इन्द्रगोपनिचयेनेव मम स्वामी याद-वाचले यावदवतिष्ठते तत्र तावन्मयापि स्थातव्यमित्यवतीर्णेनेव चक्रचापेन मध्यकुण्डदेदीप्यमानवह्निनाधिष्ठितां कमलिनीमिव पूर्वभागसमुल्लसच्चण्डप्रचण्ड-करकलितसंश्लेषचक्रद्वन्द्वमनोहराब्जयुगल्यविरतरुचिविचित्रतां कुमुदिनीमिव विधुसमागमपरिहृष्यत्कुमुदादिगणपरिवृतां, अयोध्यामिव भास्वद्वंशजात-प्रतिष्ठापितनानाविधध्वजालंकृताष्टदिग्भागां, मधुरामिव भगवद्रामानुजमन्दिर-समाश्लिष्टां, मायामिव मधुसूदनाश्रितां, काशीमिव द्विजराजशेखराधिष्ठितां,

---

1. बर्हिर्मुख (ख) 2 संयुक्त (ख) 3. गाथागान (ख)
4. ममन्त्र (ख) 5. वेत्रवित्रक (ख) 6. बृहत्पात्रसंभृतेनेव कुङ्कुमपङ्केन देवोत्सवसेवनार्थं सुवङ्गतेनेव इन्द्रगोपनिचयेन (ख)

काञ्चीमिव बद्धनियमपद्मासनदीक्षितसन्तर्पिताग्निमध्यसमुद्गतघनशोभापाकृत-समस्ततमोभरां, अवन्तीमिव वासुदेवविद्याभ्यासगुरुद्विजविशेषालङ्कृतां, द्वार-वतीमिव कृष्णवर्त्मानुसारि यदुभूभृद्राजसामाजिकसमाकुलां, धूपाश्रितामपि विधूपाश्रितां, घृतादिदिव्यैः प्रपूर्णकुम्भालङ्कृतामप्यप्प्रपूर्णकुम्भालङ्कृतां, चतुर्वर्ण-मण्डलाधिष्ठितामपि प्रथमवर्णमण्डलमात्राधिष्ठितां, भगवत्पुरस्कृतचतुर्वेदिकामपि भगवदधःकृतचतुर्वेदिकां अतिविशालां भगवद्यागशालामासेदुः ॥

तदानीं तत्र नारदो भगवतश्चतुःस्थानान्यवलोक्य,

कुम्भमण्डलबिम्बाग्निकुम्भस्थानचतुष्टये ।
स्थितोऽपि देवो भजते त्रिधामेति प्रथा कथम् ॥ २१ ॥

महाकुम्भमुद्दिश्य,

अन्तर्निरुद्धलक्ष्मीशपावनीं रीतिमाश्रितः ।
समस्तपात्राकलित ! कुम्भ ! को वा भवादृशः ॥ २२ ॥

इन्द्रः—

अहो प्रश्नोत्तरालङ्कारचातुरी !

नारदः—(मण्डलं प्रतीक्ष्य)

अत्राब्जनाभभुवनं[1] वैकुण्ठाभिख्ययाञ्चितम् ।
मुक्तावलीमुखैस्साधु रत्नैःपूर्णं विराजते ॥ २३ ॥

भगवद्दिव्यमङ्गलविग्रहमालोक्य,

श्रीपुष्टिजुष्टमन्यूनकलाभिरभिशोभितम् ।
विधुबिम्बमिहाभाति विबुधेश्वरसेवितम् ॥ २४ ॥

कुण्डमवलोक्य,

विधूमानलसंश्लिष्टं विलसद्भस्मरूपितम् ।
कुण्डमेतद्गिरीशस्य शरीरमिव राजते ॥ २५ ॥

---

1. अशाब्दनाभभुवनं (ख)

उत्तरां दिशमवलोक्य,

एष श्रीमानमृतभरितस्सोमकुम्भो यथार्थः
सेव्यो यस्माद्विबुधपतिभिश्चामृतैकाभिलाषैः ।
नक्षत्रौघा इव परिलसन्त्यङ्कुरास्तत्समीपे
नित्यं वृद्धिर्भवति रजनीतोयतश्शोभयेषाम्[1] ॥ २६ ॥

आग्नेयीमवलोक्य पाकशासनं प्रति,

राजते दीपकुम्भेऽत्र राजते दीपिकानिशम् ।
राजते वा खण्डितास्वाराजते यागमन्दिरे ॥ २७ ॥

इन्द्रः—

न दीपकुम्भसंभूतस्नेहौज्वल्यमखण्डितम् ।
वीणानिनादरसिक कथं नो विस्मयावहम् ॥ २८ ॥

अग्निमवलोक्य,

सद्विमुख आश्रयाशो बहुजिह्वोऽयं महाहवासक्तः ।
अविवाहोऽपि वधूभ्यां युक्तो वह्निस्सदारुणो भवति ॥ २९ ॥

अग्निः—

किं भगवान् पाकशासनव्याजनिन्दां तनोति । शृणु मदीयं वचनम्—

स्वाहारतो यस्सन्तुष्टस्सरुचिस्तत्र सन्निधिम् ।
भजते भगवान् देवो मयि कुण्डगते यथा ॥ ३० ॥
पातुं सुरौघं सम्प्राप्तं महारम्भश्शचीपते !
यस्सदूरीकृतो लोके भवानिव निरन्तरम् ॥ ३१ ॥

यमः—

दक्षिणावर्तवानग्निः प्राज्यगन्धमिहोद्वहन् ।
हरिणा कलितस्सख्युः सादृश्यमुपयाति हि ॥ ३२ ॥

---

1. श्रोभयेषाम् (ख)

निर्ऋतिः—

निर्दहति हेतिजालैरखिलपलाशाननर्घमणिजातः ।
कृष्ण इव कृष्णवर्त्मा पुष्णन् सख्यं मरुत्सु घनशोभः ॥ ३३ ॥

वरुणः—

सवनस्थ एष वह्निर्नागरिकान्नं चतुर्विधं हव्यम् ।
भुञ्जानः संश्लाघां कलयन्निव चालयन् शिखामिन्धे ॥ ३४ ॥

वायुः—

न हि वह्निरेष वेद्यां कुरविन्दमणिप्रकाण्डमयपीठः ।
न च तत्र धूमरेखा कुवलयदलनीलविग्रहःश्रीशः[1] ॥ ३५ ॥

कुबेरः—

हरिरद्य वह्निमध्ये निवसति न हि तत्र संशयः कार्यः ।
यत्तस्यदेहकान्तिर्धूमस्तोमापदेशतो लसति ॥ ३६ ॥

शङ्करः—

कराश्लिष्टबहुज्वालचक्रः कौस्तुभभास्करः ।
श्रियान्वितः स्वकारुण्यकलिताखिलरञ्जनः ॥ ३७ ॥
निर्दग्धदारुणामोघतेजसा कोटिसूर्यवत् ।
भासुरोऽयं वैष्णवाग्निर्विष्णुवद्भाति पूजितः ॥ ३८ ॥

एवमग्निं स्तुवत्सु गीर्वाणवल्लभेषु भगवान् यादवाचलनायको लक्ष्मी-पुष्टिभ्यां सह तत्र विविधानुपचारानङ्गीकृत्यानुगृह्य सर्वान् भक्तजनान् याग-मन्दिरान्निजमन्दिरान्तः प्रविवेश। ततः सर्वे सुपर्वाणो[2]ऽप्यन्तः प्रविश्य तत्र किल चित्रतरशातकुम्भशिखाकुम्भप्रत्युप्तप्रदीप्तविविधमणिगणकिरणसन्दोहमन्दी-कृतारविंदबान्धवं प्रतिनिशमतिसमीपसञ्चर[3]त्कुमुदिनीरमणकरस्पर्शद्रवीभवच्चन्द्र-कांतशिलामयमूर्धेष्टकानिकरनिरर्गलनिर्गलद्विमलोदकधारासञ्जनिताभिषेकनिर्मली

1. लीलविग्रहाश्रितः (क) 2. गीर्वाणोऽप्यन्तः (ख) 3. सञ्चारमाण (ख)

कृतनानारत्नमयदिग्देवताप्रतिमाप्रतिमरुचिनिचयनिरवशेषितनिखिलतमोहरं आपादान्मौलिपर्यन्तं सौवर्णकवचदेदीप्यमानमतिमानमहिमानं निरुपमानमानन्दमयदिव्यविमानमधिष्ठितं नयनविषयमिव नलिनासनतपःफलं, साकारमिव सनत्कुमारसुकृतपरिपाकं, मूर्तिमन्तमिव रतिकान्तं, सर्वदा वसन्तमिव वसन्तं, भूसुरसेव्यमिव कल्पभूरुहं, अचञ्चलमिव नीलमेघं, निष्कलङ्कमिव राकाचन्द्रं, घनीभूतमिव सुधारसं, सरूपमिव सकललोकसन्तोषं, मुहुर्मुहुर्नारायणचरणकमलसंस्पर्शात् किल मदीयसपत्निस्थिराभिख्यां भजति, अहं तु चञ्चलाभिख्यां अधिगतातो मयापि तन्निरन्तरसंपर्कस्संपाद्य इति कामनयेव, यद्वा लोकजनन्या मम लोकमातेति यशः समुचितं केवललोकाक्रमणेनैव मत्सपत्नीजनकः पत्युश्चरणोऽपि लोकमातेति कीर्तिं भजति, ततस्सोऽपि मत्पाणिना समाक्रान्तश्चेदतिशायि यशो मत्पाणिरपि भजिष्यतीति स्पृहयेव, अथवा निखिलजगत्संरक्षणजागरूको मम नायकोऽयमनिमिषदृष्टिरुन्निद्रपद्मलोचनो स्वप्नप्रियो दूरीकृतसदाशयनोचितद्विजिह्वसङ्गतिर्न कदापि निद्रामुद्रां कलयति, ततः सुस्थितावस्थायामेव तदीयचरणयुगलसंवाहनमाचरामीत्यभिलाषेणेव, आहोस्वित् पुरुषकारपदाभिषिक्ताहं निरन्तरं पत्युर्हृदय एव निवसामि, यदि कदाचित् आलिंगनचुम्बनादिक्रीडापरतन्त्रया मया भगवच्चरणारविन्दाश्रयणार्थमागता भक्तजना अज्ञाताः स्युरतस्सावधानया मया तत्रैव स्थातव्यमिति कुतूहलेनेव यद्वा मदीयकांतचरणकमलात् किलमत्सपत्नी धरणिः प्रथममवतीर्णा, तदनु कतिपयकालानन्तरं जाह्नवी सञ्जाता, पुनरितःपरं का वा अवतरिष्यतीति भिया तन्निरोधार्थं तत्रैव निवासेच्छयेव कमलवासिन्या मम भगवत्पादकमलवासः समुचित इत्याशयेनेव का वा स्वजनकडिल्लीश्वरनगरोपकण्ठवर्ती सुरतरङ्गिणीजन्मस्थानदिदृक्षयेव वा निजसंनिधिनिरन्तरकृतवासया यवनेश्वरात्मजया महालक्ष्म्यालङ्कृतेन तदीयकुचकलशनवननवोन्मेषसन्त्रुटितमुक्तासारविगलितैस्सहिमोदककस्तूरीघनसारकुङ्कुमपङ्कानुलेपसरसाङ्गुलिसंलग्नैरिव पृथुलमौक्तिकैः डिल्लीश्वरतनयावदनसरसिजविरोधितया कृष्णपक्षाश्रितस्यापि प्रक्षीणतेजसः

पत्युश्चन्द्रमसः तद्बलवद्विरोधोपशमनार्थं सन्धित्सया तत्समीपमागत्याङ्गुलिशाखाग्रनिषण्णैरिव नक्षत्रैः स्वनखरैः विराजितेन प्रणिपतदमरपतिमकुटतटघटितमणिकिरणप्ररोहसमाकलनवेलापरिहसितमधुकरनिकरपरिवृतसरोरुहेन प्रणमदुडुपतिमकुटजटाजूटविलुठदमरतटिनीसमाश्लेषसमयविडंवितमथ्यमानदुग्धसागरसमुन्मिषच्छिखरमात्रकल्पतरुशाखाग्रकिसलयेन मृदुलेन चरणयुगलेन धर्माद्यष्टपदमष्टापदमयं भद्रपीठं भूषयन्तं पदकमलमध्यमध्यासीननिजजननीविलासार्थममरसुन्दरीसमुपाहृतसरसिजनीलोत्पलनवमल्लिकादिकुसुमनिचयंनिजायुधतयानायासेन संग्रहीतुं तदुभयपार्श्वयोः मदनविन्यस्ताभ्यामिव शरधिभ्यां निजजङ्घाभ्यां उपशोभितं अनूरुसम्बन्धात् किल ममानिशाप्रकाशः संभवतीति संप्राप्तोरुसंबन्धेनेव बालार्ककांतिनिकुरुंबेण पीताम्बरेण तत्र सन्ध्यारागभ्रमेणोदितया नक्षत्रपरंपरयेव मुक्तामणिमेखलया च पृथुलधवलकोरकाभिरामनवकिसलयोपशोभितं सुरद्रुमं तुलयन्तं वलित्रयसोपानविराजितेन पुष्करोत्पत्तिस्थानेन सर्वतोमुखाभ्युदयशालिना निर्मलहृद्यमीनमनोहारिणा गभीरनाभीसरोवरेणोद्भासितं तन्नाभीसरस्समुद्धृत्य बहिर्निक्षिप्तयेव शैवालपरंपरया तत्रोद्भविष्यदरविन्दामन्दमकरंदविन्दुसन्दोहपिपासया तत्सविधनिषण्णयेव मिलिन्दपङ्क्त्या तत्र जनिष्यमाणचतुर्मुखशिशोर्मुहुर्मुहुः स्तन्यपानाय वक्षःस्थलस्थितनिजमातृसविधं जानुचंक्रमणेनागमिष्यतस्सुखसञ्चारसिद्धये सुश्लक्ष्णहरिनीलमणिपालकखचितयेव सरण्या पुरा भाष्यकारेण क्षीरधारभिर्वल्मीके विशकलीकृते बहिर्निर्गमनभीत्या तत्रैव बिलान्तरमन्विष्य दैवयोगादुपस्थितं गभीरनाभीकुहरं प्रविष्टया ततःपरमेतदाश्रयबलाद्विजराजोऽपि मयाधःकृतो भविष्यतीति धैर्येण निर्विशङ्कं हृदयपर्यन्त[1]मुन्नमितफणयेव कृष्णसर्पमूर्त्या विष्णुपदजन्मना किल मत्सखीसुरतरङ्गिणी गर्विता भवतीत्यसूयया विष्णुपदस्यापि जनकतया ततोऽप्युन्नतात्तन्नाभीकुहराज्जन्म लब्ध्वा स्वसन्तोषं हृदि कौस्तुभकान्तिव्याजेन प्रसरन्त्यै सरस्वत्यै निवेदयितुमूर्ध्वं प्रवहन्त्येव कलिन्दनन्दिन्या

1. मर्यन्त (ख)

लोमलतया विराजितोदरं कह्लारगर्भितमिव कुमुदवनं कोकनदराजिविराजितमिव सुरतरङ्गिणीह्रदं, बडबानलचुम्बितमिव क्षीरसागरं, बालातपव्याप्तमिव रजतगिरिगह्वरं, वप्रक्रीडासल्लग्नगैरिकमिव सुरवारणकुम्भस्थलं, निस्तुलकौस्तुभरत्नदीपोज्वलं निर्मलपृथुलमुक्ताहारपरम्पराभासुरमुरस्थलमधिष्ठितया मत्स्यमूर्त्येव मधुगर्वनिर्वापणप्रवीणवचोधोरण्या, कूर्ममूर्त्येव निरवधिकशुभदया समुद्रे मन्दराभवत्या, वराहमूर्त्येव क्षमालिङ्गितहृदयया, नरसिंहमूर्त्येव प्रह्लादजनकदानकरिहस्ताम्बुजया, त्रिविक्रममूर्त्येव निजमहाचरणव्याप्तत्रिलोक्या, जामदग्निमूर्त्येव नक्षत्रनाथह्रद्यमुखमण्डलया, दाशरथिमूर्त्येव निर्मलहृदयगुहावासलाभजनितसन्तोषतया, रेवतीरमणमूर्त्येव बलभद्राभिख्या संशोभितया, कृष्णमूर्त्येव भगवत्कन्दर्पोत्पादनप्रगल्भया, कल्किमूर्त्येव विष्णुयशोनुरूपजन्मना तुलसीदलार्चन[1]संतुष्टयाप्यतुलसीदलार्चन[2]सन्तुष्टया दर्भजाताकलिताध्यादिकयापि विदर्भजाताकलिताध्यादिकया अभिजातसुन्दरीसंसेवितयापि नाभिजातसुन्दरीसंसेवितया, अगराजकन्यकाभीष्टदायिन्यापि नागराजकन्यकाभीष्टदायिन्या द्रौपद्याभिष्टुतयाप्यद्रौपद्याभिष्टुतया नलपत्नीकृतसेवनयाप्यनलपत्नीकृतसेवनया हल्याराधितयाप्यहल्याराधितया कृपयेव मूर्तिमत्या, क्षमयेव साकारया क्षीरसागरकन्यकया समाश्लिष्टं मत्प्रियतमायाः सदनमिदं न कदापि परित्याज्यमिति व्यामोहेनेव भगवता मयि मूर्तीभूते निरन्तरं परिगृहीते भक्तजनाभयप्रदानान्तरायो भवामीति भियेव गृहीतसूक्ष्मरेखारूपेण कमलेनाङ्कितेन मदाश्रितानां फलं चत्वारः पुमर्था इति वा,

श्रीरङ्गं वेंकटाद्रिश्च हस्तिशैलमनन्तरम्।
ततो नारायणाद्रिश्च मम धाम चतुष्टयम्॥

इति वा, युगभेदेन ब्रह्मादयो ममाराधकाश्चत्वार इति वा अत्रावतरणात्प्रागेव त्रिधामेति व्यवहारः, इतःपरं मम चत्वारिस्थानानीति वा, अङ्गुलिसंज्ञामिव दर्शितया निखिलदेशानाक्रम्यात्रागन्तुकामस्य तुरीययुगस्य प्रवेशनिषेधार्थमिव वा

1. तुलसीतार्चन (ख) 2. तुलसीतार्चन (ख)

प्रसारितेन चक्राद्यायुधत्रयमात्रभूषितस्यास्य कथं नारायणमूर्तित्वमिति शङ्का-विलचेतसां मूर्तिलक्षणज्ञानां स्वतलस्थितं सूक्ष्मरेखामयं पद्मं दर्शयितुमिवोन्न-मिततलेन स्वभावसिद्धे स्वतलारुणिम्नि लक्ष्मीकुचकलशसंमर्दसंलग्नकुङ्कुमपङ्क-भ्रान्त्या महासूयाजुषां वसुंधरादिसुन्दरीणां भ्रमनिवृत्तये सम्यक् स्वतलं दर्श-यितुमिव प्रोत्तानिततलेन सदूर्मिकेनापि सद्भङ्गक्षतिकृता खरांशुभासुररत्न-शोभितेनापि नखरांशुभासुररत्नशोभितेन, समुद्रेणाप्यस्पृष्टकुवलयेन नवरत्नमय-कङ्कणालङ्कृतेन निखिलजनाभयंकरेण दक्षिणकरेण सफलीकृतभक्तलोचनं कल्पान्तरे देवानां मन्दराहरणश्रमं विनैव दुग्धसागरमन्थनाय सङ्गृहीतयेव मन्थनयष्ट्या जगदण्डभाण्डनिर्माणायेव पश्चाद्धस्तगृहीतचक्रभ्रमणाय सम्पादित-येव कुलालयष्ट्या चरमयुगे भूनिषण्णैकचरणमात्रधर्मावलम्बनार्थं प्रसारित-येवावलंबनयष्ट्या यदुभूधरवारणस्याचञ्चलतासिद्ध्यर्थं तन्मूर्ध्नि निखातये-वाङ्कुशयष्ट्या प्राग्गदया त्याजितरिपुनार्यङ्गदया परिहृतभक्तमनोगदया असुर-जनोद्वेगदया महागदया विराजितवामहस्तं बाह्यतमोनिरासमात्रशीलाभ्यामा-वाभ्यां अन्तरतमोनिरसनविद्यापि भगवतोऽध्येतव्येत्याशया तद्वदनारविन्दो-भयपार्श्वगताभ्यामिव सूर्यचन्द्राभ्यां सूर्याचन्द्रमसोः सन्निधानासन्निधानाभ्यां किलावयोर्विकाससङ्कोचौ सम्भवतः ततो निरन्तरं तत्संनिधानमेव आश्रयित-व्यमित्याशया पुष्पवदात्मकभगवल्लोचनद्वयोपान्तभागावाश्रिताभ्यामिव कोकनद-कुमुदाभ्यां सौवर्णराजततयावयोः सर्वोत्कृष्टयोरपि मन्दरगोवर्धनौ कदाचित् भगवदुद्धरणगर्वितौ भगवतस्तदावाभ्यामपि लभ्यमिति कूतूहलेन करार-विन्दयोः कृतावासाभ्यामिव सुमेरुकैलासाभ्यां निजपादाब्जनिकेतेनपयोज-वासिनीजनकडिल्लीश्वराज्ञापरिकल्प्यमानभोगतया आदरातिशयेन निजहस्त-परिगृहीताभ्यामिव प्राभातिकार्चननैवेद्यसौवर्णरेखाञ्चितगोधूमपैठरनवनीत-पिण्डाभ्यां निराकारोऽयं भगवान् निजभक्तानुग्रहार्थं साकारः प्रकाशते तथावाभ्यामपि तद्गुणाभ्यां भवितव्यमिति मूर्तीभूय हस्तगताभ्यामिव प्रताप-यशोभ्यां सुदर्शनपाञ्चजन्याभ्यामनुरञ्जितदेहकान्त्या तार्क्ष्यमरालाभ्यां युगपदव-

लंम्बितं गगनं तुलयन्तं बडबानलज्वालावर्तफेनकूटाभ्यां कलितानुषङ्गमम्भोधिं विडंबयन्तं किंशुकमल्लिकोपरञ्जितं तमालवनं परिहसन्तं कण्ठकम्बुगर्भस्रुत-मुक्तासारक्षीरधाराभिषिच्यमानवक्षःस्थलपीठारूढश्रीवत्सलाञ्छनसालग्रामं कपोलदर्पणप्रतिफलितकुरविन्दमणिमकरकुण्डलतया लक्ष्मीमुखकमलचुंम्बनावसरसंलग्नकुङ्कुमपङ्ककृतमकरिकाभ्रमं जनयन्तं हृदयकुहरगतस्य कल्पान्तरे मनसो जनिष्यमाणस्य हिमांशोः मरीचिप्रसरणेव मुखद्वारा बहिर्निर्गतेन मन्दहासेन समुल्लसिताधरपल्लवं मदनस्य सव्यहस्तमुष्टिगृहीततया अदृश्यमानमध्यभागेनेव इक्षुकोदण्डदण्डेन भ्रूलताप्रकाण्डेन तत्रयुगपल्लक्ष्मीधरण्योः चित्तद्वयजयाय संयोजितेनेव शरधिसमुद्धृतारविंदबाणयुगलेन लोचनद्वयेन च विलसन्मुखमण्डलं तमालश्यामलचलद्भ्रमरकाननविलसन्नासावंशरन्ध्रसमुद्गतश्रुतिमधुरनिःश्वासारावश्रवणसुखनिर्भरतयेव निश्चञ्चलयोरंसोपरि वैजयन्तीगतमरतकमयशुकयोःकुरविन्दत्रोटीपुटरुचिपटलसन्ध्यारागसमावृतफालप्रदेशबालचंद्रनिःसृतामृतधाराशङ्कावहोर्ध्वपुण्ड्रेखाद्वयमध्यविराजमानहेमतिलकं मदीयहृदयकुहरसंभूतसंपत्कुमारस्यानिरुद्धकिरीटधारणं भविष्यति मम तु प्रद्युम्नकिरीटधारणमुचितमित्यालोचनयेव हिरण्यमयकिरीटमाबिभ्राणमापीठान्मौलिपर्यन्तं पश्यतां भक्तानामपातकताद्यभीष्टसिद्धिं[1] कुर्वाणमवलोकयामासुर्नारायणम्।

नारायणाय नवनीरदसंनिभाय
नालीकसंभवतपः परितोषिताय।
नाकौकसामपि सुखावहयादवाद्रि-
नाथाय नीरधिसुतापतये नमोऽस्तु ॥ ३९ ॥

अपि च,

अङ्गारराशिनिभतुङ्गाधिकाघतति[2]भङ्गावहाद्भुततमा-
पांगावलीविमलगङ्गाझरीशुभतरङ्गाश्रिताम्बुजदृशम्।
शृङ्गारवारिधिमनङ्गायुतप्रदकुरङ्गाक्षिगर्वहरदृक्-
भृङ्गालकानटन रङ्गायितोरसमिमं गायताद्य नुतिभिः ॥४०॥

1. भक्तानामभीष्टसिद्धिं (ख) 2. तुङ्गातिकान्तितति

एवं भगवन्तं इन्दिराकान्तं प्रणम्याभिष्टुत्य च प्रदक्षिणीकर्तुकामानमरानित्थमकथयद्वीणामुनिः ।

चण्डप्रचण्डाविह शङ्खपद्मनिधी इव प्रोल्लसतः प्रगल्भौ ।
मुकुन्दसङ्गाभिरतौ सकुन्दनीलालकावासविराजिताननौ[1] ॥ ४१ ॥

तत्पार्श्वतोऽवलोक्य,

नित्यं विष्णुद्वारकावासहृद्यं लावण्याढ्यं बाडवैकावलम्बम् ।
पौनःपुन्यात्सत्सुपर्वावगाह्यं संसेवध्वं वाहिनीनाथमेनम् ॥ ४२ ॥

इन्द्रः—

किं भो मुनीन्द्र ! भगवदुत्सवार्थं समुद्रोऽप्यागतः प्रत्यक्षो भवति ।

नारदः (विहस्य)—

विष्वक्सेनसेवा मया प्रतिपादिता । ततस्सम्पत्कुमारप्रासादाग्रभागस्थां वकुलाभरणजगतीमवलोक्य,

शठरिपुपरकालाभ्यामाक्रान्तेऽयं निरङ्कुशजगती ।
उग्रोक्तिविरहितानां मधुजिद्वचसामसाध्यमिह किं स्यात् ॥४३॥

ततो वहिर्निर्गत्य मण्टपाग्रतोऽवलोक्य,

सुपर्वणां यो वलयै[2]स्समञ्चितो वियन्नदीं मूर्ध्नि वहन् समुन्नतम् ।
सितांशुकाप्तद्विजराजशेखरो भाति ध्वजस्तंभ इहैष शुम्भुवत् ॥

अथेन्द्रादिभिस्साकं प्रदक्षिणं कुर्वन्नारदः पाकशालामवलोक्य,

दर्वीमादाय बालं कमपि किल पुरा भैक्षदानेन तृप्तिं
निन्ये कन्यापयोधेरिति हि कृतिमुखोल्लास[3]कीर्त्या न तृप्ता ।
सर्वानप्याश्रितौघानलघुभिरशनैः पूर्णकामान् विधातुं
देशे माहानसे[4] किं वसति यदुधराधीश्वरी लोकमाता ॥४५॥

---

1. विराजितास्यौ (क) 2. वलने (क) 3. उल्लासि (ख)
4. महानसे (ख)

इन्द्रः—

ननु तर्हि किमस्याः करकमले सन्दृश्यमाना दर्वी ।

नारदः—

नहि सनालं कमलम् ।

इन्द्रः—

अतुलामृतप्रदात्र्या ममोचिता न स्यात् ।
इति किं विहाय दर्वी धत्ते कमलं पयोधितनयासौ ॥ ४६ ॥

नारदस्तत्समीपवर्तिन परवासुदेवमवलोक्य सानन्दं,

श्रीमान् वैकुण्ठनाथोऽयमध्यास्ते शेषपीठिकाम् ।
तोळप्पाचार्यवर्यस्य कीर्तिं मूर्तामिव स्थिताम् ॥ ४७ ॥

इन्द्रः—

को नाम तोळप्पाचार्यः ? किं तस्य तादृग्विधं यशः ?

नारदः—

स खलु पुरा समानीतपाराशर्यवचस्सुधारसेन स्वविरुद्धार्थाकर्णन-संखिन्नश्रुतिमातुश्चिन्ताविमोचकेन पाषण्डषण्डदुण्डुभरवण्डकोदण्डपण्डितेन श्रीभाष्यकारपक्षेश्वरेण समुत्सारितदर्पेषु बौद्धजैनसर्वेषु दिगन्तबिलान्तरप्रविष्टेषु पुनः कतिपयकालानन्तरं समुद्धतमस्तकेषु विषमहितांस्तान् जैत्रयात्रया विनिर्जित्य तदर्पितमणिमयच्छत्रयुगलमूरीकृत्य यदुशैलनायकस्य यतिराज-सम्पत्कुमारस्य घर्मकालीनश्रमशान्त्युत्सवपर्याप्तदिनक्रियमाणवैकुण्ठनाथालङ्कार-सेवां लब्धुकामः स त्वरया आगत्य मध्येमार्गं सवितरि मत्करकृतापराधहेतोः खलु भगवता श्रमशान्त्युत्सवः क्रियते अथ पुनरपराधः सम्भवेदिति भियेव चरमगिरिकान्तारं भगवति गाढान्धकारसहचरे महामेघनिकरे यदुशैलनायकस्य आतपवारणोपचारं मदीयं मणिमयच्छत्रसमर्पणेन समाक्रमिष्यत्यतोऽन्तरायः कार्य इति धियेव महावर्षं प्रवर्षति । पदात्पदान्तरं चलितुमप्यशक्तो मनसैव

देवं विचिन्तयन् वात्सल्यातिशयेन स्वप्ने प्रसन्नं परवासुदेवरूपं संपत्कुमार-मनुभूय परेद्युर्यादवाचलमासाद्य प्रत्यक्षेणानुभवितुं पुनरुत्सवमारचय्य मुक्तात-पत्रयुगं समर्प्य स्वस्वप्नानुभूतं परमपदनाथमत्र प्रतिष्ठापयामास ।

इन्द्रः—

(सश्लाघं) तर्हि गरीयान् तोळप्पाचार्यः । यतः

आचार्या बहवो निन्युः भौमान्वैकुण्ठवल्लभम् ।
गुरुरेष तु वैकुण्ठनाथमेवानन्यमहीम् ॥ ४८ ॥

नारदः—

(किञ्चिदन्तरं गत्वा)—

वृन्दावनमिदं पश्य नन्दात्मजमनोहरम् ।
वन्दारुजनतानन्दसंदायि तुलसीयुतम् ॥ ४९ ॥

इन्द्रः—

किमत्र श्रीपादलाञ्छनम् ?

नारदः—

वृन्दावनं द्रष्टुमिहागतस्य
मुहुर्मुहुः श्रीयदुभूधरेशितुः ।
पदाम्बुजातद्वयलाञ्छिताद्यसौ
समुल्लसत्यद्भुतभद्रपीठिका ॥ ५० ॥

ततः सुदर्शनसन्निधिं गत्वा साञ्जलिबन्धं,

घोरासुरौघनीहारपारोत्सारणभास्करः ।
सुराङ्गनानां माङ्गल्यहेतो हेतीश ते नमः ॥ ५१ ॥

किञ्च,

रक्षोध्यक्षवक्षोविदलनजनितासृग्धुनीसिक्तनैज-
ज्वलामालाकलापोल्बणरुचिजितोच्चण्डमार्तण्डभानुः ।

स्पष्टाश्लिष्टाष्टपाण्यङ्कुशमुसलगदाचापचक्राब्जपाशो
दद्यादद्यानवद्यो यदुगिरिनिवसेद्वेतिराड् वाञ्छितं नः ॥५२॥

इन्द्रः—(सविस्मयं),

सद्यः प्रोद्यत्स्फुलिङ्गोद्गमचनचटुचटात्कारनिर्घातघोष-
प्रोद्विग्नाशागजार्तिध्वनिविततिविनिर्भिन्नविध्यण्डभाण्डा ।
संवर्तोद्भूतवह्निप्रतिभटनिजरुग्वर्गसन्तप्तसप्तो-
दन्वत्प्रसर्पत्कथितकणगणासेकचुङ्कारिणीयम् ॥ ५३ ॥

बिभ्यद्रक्षोनिकायाननकलिततृणस्तोमदाहानुदग्ध-
श्मश्रुप्रान्मार्जनोद्यत्करतलचलनालोकसंहृष्टलोका ।
यद्वद्रिस्थानभास्वन्मधुमथनमहानीरदोत्थाधिकश्री-
शम्पासम्पातशङ्काकलनपटुतरा भाति सौदर्शनार्चिः ॥५४॥

नारदः—(तदुत्तरतोऽवलोक्य),

काञ्चीपूर्णमिमं पश्य काञ्चित्कान्तिमुपाश्रितम् ।
द्विरदाद्रिकृतावासवरदासक्तमानसम् ॥ ५५ ॥

भाष्यकारयतीशस्य प्राण एव मुनीश्वरः ।
यतस्तेन स्वसुः स्थाने स्थापितोऽयं विराजते ॥ ५६ ॥

इन्द्रः—

अहो अर्थान्तरमपि फलति तव वाणी । का नाम तस्य यतीश्वरस्य स्वसा ? कुतस्तस्याः स्थाने मुनिरयं स्थापितः ?

नारदः—

प्रसिद्धा खलु यतीश्वरभगिनी गोदादेवी । पुरात्र जीर्णोद्धारकाले तस्याः प्रतिष्ठां चिकीर्षुणा भाष्यकारेणेदं मन्दिरं निर्माय तावन्मा कुरु-मत्सपत्नीप्रतिष्ठाम् । मदंशभूतायास्तस्याः जन्मोत्सवादिकं सर्वं ममैवाचरेति

जगज्जनन्या स्वप्ने समाज्ञप्तेन तस्मिन्स्थाने तदनुमत्या काञ्चीपूर्ण एष प्रतिष्ठापिताः ।

इन्द्रः—

सर्वत्र[1] विष्णुपदभाक्काञ्चीपूर्णोह्ययं मुनिः ।
तन्मध्यदेशमित्रत्वान्ननु तत्सम्मतोऽभवत् ॥ ५७ ॥

नारदः—

धान्यशालामवलोक्य,

मृगमदविलसत्तिलका सद्गुणशाली प्रशस्तसुखभागा ।
सुरुचिरभावयवासौ प्राप्ता सततं प्रियङ्गुणाधिक्यम् ॥ ५८ ॥
सद्यस्सतनकुम्भस्थ प्राज्यश्रीभिर्मनोहरा जगताम् ।
लसतीह धान्यशाला यदुशैलाधीश पट्टमहिषीव ॥ ५९ ॥

इन्द्रः—

कुतोऽत्र हनुमानस्ति दक्षिणं हस्तमुद्वहन् ।
युगपद्रक्षसां सङ्घं संहरन्निव कोपतः ॥ ६० ॥

नारदः—

सततं मारुतिः श्रीमानत्रास्ते रक्षणाय हि ।
सर्वधान्यसमृद्धिं कः पश्यन्नन्योऽस्ति निःस्पृहः ॥ ६१ ॥

ततस्सर्वे लक्ष्मीमन्दिरमासाद्य बहिः दण्डवत्प्रणम्य अन्तःप्रविश्य तत्र किल मित्रनिभचित्रमणिपत्रशतपत्रवरपीठवरमध्यं अध्यासीनामचञ्चलामिव विद्युल्लतां वासरेऽपि विराजन्तीमिव चन्द्रकलां, सर्वदा समुल्लसन्तीमिव वासन्तिकावल्लरीं, अनुष्णामिव दीपेरखां, मूर्तिमतीमिव भगवद्भयां, प्रत्यक्षामिव क्षान्तिं, भुवं गतामिव तारां, कुबेरनगरीमिव रुचिरालकाभिख्यां, वनराजिमिव तिलकोल्लसदळिकां सभामिव सुमनोमणिसमाकलितश्रुत्यन्तां, युवपङ्क्तिमिव

1. सर्वज्ञ (ख)

सततताकलितसुभ्रूरुचिं, न्यायनीतिमिव अलघुनासाक्षिसमुल्लासेन सकल-हृदयङ्गमां संपत्कुमारसभ्यगोष्ठीमिव मुक्तावलीसदृशद्विजराजशोभितमुखभागं भटपङ्क्तिमिव चकचकितचन्द्रहासाञ्चितां वसंतकालोद्यानराजिमिव बिम्बशोभा-धरपल्लवां, पर्वतभूमिमिव विपुलगण्डस्थलाभिरामां, कालिन्दीमिव नीलवेण्या-कलितां, रामपत्नीमिव सुग्रीवार्पितमणिभूषणां, प्रावृषमिव पीनपयोधरां, तपोवन-मिव मुक्ताहारोपशोभितां, किष्किन्धामिव चतुर्भुजसंस्थापिताङ्गदां, मेरुभूमिमिव रत्नकटकाञ्चितां, पयोधिवेलामिव रत्नोर्मिकाविभासुरां, निष्कुटसीमामिव मृदुल-वल्लीभिः उज्ज्वलोदरां ब्रह्मविद्यामिव साधुनाभ्यासमानीतस्फूर्तिं गजश्रेणिमिव वरदानाभिरामां, तमालवनीमिव घनाभयोज्ज्वलं, करेणुमिव पुष्कराञ्चितकरां तुण्डीरसीमामिव काञ्चीपरिमण्डितमध्यभागां, कुलाचलततिमिव बृहन्नितम्बोप-शोभितां, हरिद्रामिव सुवर्णांशुकां, दिवमिव सुवर्णसवर्णोरुरम्भां अश्वपङ्क्तिमिव जम्बालतासमुज्ज्वलां कमलिनीमिव सहंसकपट्टपद्मां पद्मां समवलोक्य निर-वधिकानन्दनिमग्नाः इत्थं सन्तुष्टुवुः ॥

जय जय यदुभूधरेन्द्रकान्ते
श्रुतजनवर्गसुरद्रुलोचनान्ते ।
जय जय कमलेऽङ्घ्रिपङ्कजं ते
शिरसि निधेहि ममाद्य हेमकान्ते ॥ ६२ ॥

इन्दिरविकचपद्ममन्दिरे
चन्दिरेऽपि निहिते मुखोपमा ।
लोचने कमलगर्व[1]मोचने
ये च नेह भजतोऽन्य तुल्यताम् ॥ ६३ ॥

अपि च,

कमले दयासि कमले करद्वये
कमलेषु मातरमलेन चेतसा ।

1. कमलगन्धलोचने (ख)

भवतीं नमामि भवती प्रतापतः
परिरक्ष देवि करिरक्षकाङ्गने ॥ ६४ ॥

क्षीराम्बुधिपूरामलताराधिप भास्व-
द्धारावलिहीरांशुभिरारादिह भान्तीम् ।
घोरामयसारापहनारायणपत्नीं
क्रूरासुरवीराहवधीरामिह वन्दे ॥ ६५ ॥ इति ।

ततो बहिर्निर्गत्य लक्ष्मीमन्दिराग्रवर्तिनं शठकोपमुनिमवलोक्य,

नारदः—

सुमनो गुणाधिकोऽयं[1] चम्पकनामा शठारिमुनिरस्य ।
भ्रमरहितत्वं वकुलामोदश्चोभौ गुणौ कथं स्याताम् ॥ ६६ ॥

इन्द्रः—

वकुलाभरणस्यास्य चम्पकाभिख्याश्रयणे किं निमित्तम् ?

नारदः—

अस्ति किञ्चिन्निमित्तम् । पुरा किल कलिवर्षप्रादुर्भावमहिमसञ्जनित-पाषण्डषण्डमण्डूकमण्डलाखण्डकोलाहलमौखर्येण सुमनोऽभिनन्द्य शाखास्स-मधिगतानां द्विजवराणां श्रुतिमधुरस्वराकर्णनान्तराये सञ्जनिते तदुत्सारणाय श्रीवैकुण्ठात् धरण्यामवतरेति स्वाज्ञानुसारेण कृतावतरणं फणाभृद्रमणं चिरायालभमानतया तमन्वेष्टुमिव लक्ष्मीकबिलं प्रविष्टे यदुगिरीश्वरे तत्साहा-य्यार्थमिवास्मिन् पराङ्कुऽशेपि धरणीगह्वरं गते नानावर्णधातुमयगिरिप्रदेशेऽस्मिन् अन्वर्थकाननं गते तस्मिन् पराङ्कुशान्तर्धानस्थाने एतदावासभूतनिजमूल-कृतया श्रीनगर्यां बिम्बातरुरञ्जितो[2] भवति । अहमप्येनं मूले कृत्वा तादृशीं प्रशस्तिं भजिष्यामीति कुतूहलेनेव चम्पकतरौ प्ररूढे कतिपयकालानन्तरं तस्मिन् श्रीभाष्यकारफणीश्वरे विषमहितद्विजानाश्रिततया लोकातिशायिनस्तस्य

1. गणाधिकोऽयं (ख) 2. चिञ्चातरुरञ्जितो (ख)

लाभसन्तुष्टं विष्णुवर्धनाख्यं नरेन्द्रं संप्राप्य तेन साकमिमं गिरिमधिरूढे स्वसन्दर्शनमात्रेणैव पाषण्डमण्डूकेषु कान्दिशीकेषु वल्मीकचम्पकतरुकोटरयोः स्ववासतया तन्मूलगतौ यदुगिरीश्वरपराङ्कुशौ स्वयं विज्ञाय तावातिथ्येन प्रकाशमानीय तदनुज्ञया चम्पकतरुं ध्वजस्तम्भीकृतवति तदा प्रभृत्ययं चम्पकमूलवासित्वेन चम्पकमुनिरिति प्रशस्तो भवति ।

इन्द्रः—

(सशिरः कम्पं) श्लाघ्यतमोऽयमितिहासः ।

नारदः—

तत्पार्श्वतोऽवलोक्य,

यस्स्वप्नलब्धां द्रमिडागमाख्यां
सुधां बुधानां वसुधागतानाम् ।
विधाय सेव्यां व्यधुनोद्विमोहं
स नाथ योगीश्वर एष भाति ॥ ६७ ॥

तेन सहैकासनाधिरूढं यामुनाचार्यमवलोक्य,

वीक्षस्व यामुनं तीर्थं कृष्णरुच्यास्पदान्तरम् ।
रामाकर्षणतो जज्ञे यस्योदञ्चितरङ्गता ॥ ६८ ॥

ततः किञ्चिदन्तरं गत्वा लक्ष्मीमन्दिराभिमुखं पतगराजाधिरूढं भगवन्तमिन्दिराकान्तमवलोक्य,

अयं किलाहिसंहारार्थमधिगतमहोग्रतायाः अस्याः अम्बुजवासिन्याः प्रसन्नतासिद्ध्यर्थमत्र तदभिमुखं श्रीभाष्यकारेण प्रतिष्ठापितः । खगवाहनो भगवान् वासुदेवः सूर्य इव कमलोल्लासकरो विराजते ।

इन्द्रः—

पुनर्दूरतो लक्ष्मीमवलोक्य,

अहिमर्दिन्यहमेकेत्येवं गर्वोद्धता विशालाक्षी ।
पतिवाहनमहिशत्रुं दृष्टावनता किमु प्रसीदन्ती ॥ ६९ ॥

ततो भगवद्रामानुजसन्निधिं गत्वा नारदस्साञ्जलिबन्धं,

वाणीदत्तहयास्यबिम्बमनघ क्षोणीसुराधीश्वर-
श्रेणीसंवृतमाश्रयेयमनिशं प्राणीप्सितार्थप्रदम् ।
योऽणीयांसमणेरपीक्षितुमहो स्वैणीदृशं वञ्चयन्
शोणीकृत्य निजांशुकहृदि दधौ पाणी स्मरन् केशवम् ॥७०॥

इन्द्रः—

श्रीमानेषभुजङ्गराडिह कथं भोगं विहायोज्ज्वलं
योगं प्राप्य यतीश्वरो विजयते नास्त्यस्यजिह्वाद्वयम् ।
त्यक्त्वा व्याकृतिमद्यवेदमकुटीभाष्यं ततानादरा-
न्नम्रेभ्योमृतमेष यच्छति तरामाशीभिरव्याहतम् ॥ ७१ ॥

नारदः—

इतः पश्य तन्मुख्यशिष्यं कूरनाथम् ।

इन्द्रः—

यातोऽङ्कुरति लोकानां शुभमस्मान्महात्मनः ।
शुभाङ्कुरादिनाथाख्यां ततोऽयं वहति ध्रुवम् ॥ ७२ ॥

नारदः—

अन्यतोऽवलोक्य,

नन्दगोपतनयं शिशुरूपं
मन्दहासविलसन्मुखपद्मम् ।
कुन्दरम्यरदनं विबुधानां
वन्दनीयचरणं भजताद्य ॥ ७३ ॥

देवाः—

यागागारस्य दक्षिणतोऽवलोक्य, भो ! देवर्षिसत्तम ! कोऽयमद्भुततेजा इह प्रकाशते ?

नारदः—

लोकाचार्यगुरूत्तमोऽयमनघास्तोकाद्भुतश्रीयुतः
प्राकारान्तरमध्यतोऽत्र लसति श्रीकान्तसेवापरः ।
लोकालोकधराधरावधिगतं राकासुधांशूज्ज्वलं
नाकावासिभिरीड्यमस्य हि यशः पाकारिमुख्यैरपि ॥७४॥

ततो गोपुरद्वारसमीपं गत्वा नारदः,

अत्रोत्कृष्टगिरावाप्तविलसच्चतुराननम् ।
गोपुरं कलयाम्येतत्पितामहमिवापरम् ॥ ७५ ॥

बहिर्निर्गत्य प्राचीमवलोक्य, अहो ! क्षणमिव व्यतीता रात्रिः यत्तस्समुन्मिषति भगवान् विभावसुः ।

इन्द्रः—

प्रत्यूषकालपरिचारकसत्तमोऽय-
मर्घ्याम्बुहेमकलशा[1]मरुणार्करूपाम् ।
उद्धृत्य वारिधिजलादुदयाद्रिहस्ति-
मस्ते निवेशयति[2] नूनमिह प्रणेतुम्[3] ॥ ७६ ॥

नारदः—

तर्हि वयमपि सर्वे शीघ्रं वेदपुष्करिण्यां स्नात्वा भगवदाराधनावसर-मनुसरामः ।

(इति गिरेर्दक्षिणभागमाश्रित्य पुष्करणीमवलोक्य),

वर्ण[4]त्रयावगाहप्रकटितमाहात्म्यमादिमं तीर्थम् ।
अष्टाक्षराद्य[5]वर्णादविशेषमिदं विभाति वेदाद्यम् ॥ ७७ ॥

---

1. कलशीम (ख) 2. नियोजयति (ख) 3. प्रणेतुः (ख)
4. वर्णि (ख) 5. अक्षराद्य (ख)

इन्द्रः—

भोः ! पुराणोक्तं अष्टाक्षरमयत्वमष्टतीर्थानामनुसृत्य शेषेणापि[1] समर्थितमत्र प्रणवसादृश्यम् । इतोऽप्युपरि शृङ्गभागे किञ्चिदस्ति तीर्थम् । किं तदपि पौराणिकम् ?

नारदः—

तदप्यागमपुराणप्रतिपादितमेव । तथाहि,

पुष्पवती जनकसुता पुष्कलपयसीह लक्ष्मणानीते ।
पुष्करवत्यमलतमे पूर्वं स्नाता हि पुण्यतीर्थं तत् ॥ ७८ ॥

इन्द्रः—

(सशिरः कम्पमन्यतोऽवलोक्य), भो योगीन्द्र ! किमत्र बहवो यतीन्द्राः काषायाम्बराणि सङ्गृह्णन्ति ?

नारदः—

इयमेव परिधानशिला । अत्र हि दत्तात्रेयः पूर्वं काषायं सङ्गृहीतवान् ।

इन्द्रः—

तुर्याश्रमभाग्भिस्तत्पूर्वं सत्सप्ततन्तुगुणवद्भिः ।
परिकलितानुगुणोऽयं परिधानशिला विभाति सान्वर्था ॥७९॥

(गिरेः पश्चिमतोऽवलोक्य अधस्तात्) केऽयमुपत्यकायां काचन नदी परिदृश्यते ।

नारदः—

सेविता यादवेन्द्रेण सद्वृन्दावनभागियम् ।
सूर्यादृता श्यामलता भूषिता यादवी नदी ॥ ८० ॥

इन्द्रः—

किं कालिन्दीमिव वर्णयसि ?

---

1. श्लेषेणापि

नारदः—

तादृशमहिमवत्येव ।

इन्द्रः—

तर्हि तत्रापि स्नानं करिष्यामः ।

नारदः—

किमिदानीमेव त्वर्यते ? अष्टतीर्थेष्वपि प्रत्यहमेकैकस्मिन् स्नास्यामः । तदनुदूरतो घण्टाध्वनिं श्रुत्वेत्थमकथयत् —

भो देवास्तूर्णमुत्तिष्ठत । अलमाह्निकविस्तरेण । ततः पुनरुत्सवानन्तरं स्वर्धुनीतीरे यथेच्छमनुष्ठीयताम् । इदानीं रामानुजमुनेराराधनोपक्रमो जातः । इतः परमपि विलम्बे भगवतो विश्वरूपसेवाप्यतिक्रमिष्यतीति ।

इन्द्रः—

भो मुनीन्द्र ! किं प्रथमं एव रामानुजाराधनम् ?

नारदः—

अपि श्रुतं कलौ युगे तु संप्राप्ते यतिना पूज्यते तत इति ततः प्रथममाराधकस्यास्य हि आराधनमिति बोध्यम् ।

इन्द्रः—

(सविस्मयं) कथमर्चारूपेणाभ्यर्च्यते भगवान् ?

नारदः—

(सकोपं) भो शचीपते ! ह्यो रात्रौ कथं भवतां कुशलं पृष्टवानर्चावतारस्य यतीश्वरः ।

इन्द्रः तूष्णीं बभूव । ततस्सर्वेऽपि त्वरया भगवद्गेहमासाद्य प्रासादस्य पुरतः पूर्वाभिमुखां कपिलामवलोक्यावतस्थिरे ।

नारदः—

श्रीवत्साङ्कललितरुचिः कपिलाख्या वृषप्रियाहम् ।
अतिशयिता कां विष्णाविति किं पश्चात्करोति गौरेनम् ॥८१

इन्द्रः—

सत्यं महर्षिः कपिलाचार्य इति भगवतोऽप्यस्ति नामधेयम् । तदा बहवो द्विजेन्द्राः साञ्जलिबन्धं सुप्रभातश्लोकानित्थमनुसन्दधुः ।

अन्तर्भवान् जलनिधेस्तनयास्तनौ द्वौ
दृष्ट्वा पयोजमुकुलत्वधिया निशैव ।
अस्तीति चिन्तयतु नाद्य निशा प्रयाता
श्री यादवाचलपते तव सुप्रभातम् ॥ ८२ ॥

दृष्ट्वा निशांस्तनतटे जलधेस्सुताया
रात्रिर्गतेति गदितेऽपि मया ह्यतथ्यम् ।
त्वं मन्यसे ननु विभो न निशा हरिद्रा
श्री यादवाचलपते तव सुप्रभातम् ॥ ८३ ॥

लक्ष्मीमुखं मृगमदाङ्कितमिन्दुबिम्बं
तारागणं तदुरसि स्थितमौक्तिकानि ।
मत्वा न चिन्तय निशेति च सा व्यपेता
श्री यादवाचलपते तव सुप्रभातम् ॥ ८४ ॥

आलिङ्गनत्रुटितहारगणस्य मुक्ता
व्याजेन तारनिकराः परितः पतन्ति ।
तस्मान्निशा व्यपगता भगवन्नमिथ्या
श्री यादवाचलपते तव सुप्रभातम् ॥ ८५ ॥

लक्ष्मीकुचकौ त्वं पश्य श्रीमन् परस्परं मिलितौ ।
न हि वाचा मम मिथ्या यदुशैलाधीश सुप्रभातं ते ॥ ८६ ॥

वेदध्वनिं शृणु बहिर्मणितेन चालं
पश्याद्य दर्पणमिमं कमलाननाभम् ।

कन्दर्पपूजनविधेः समयो ह्यतीत(ः)
श्री यादवाचलपते तव सुप्रभातम् ॥ ८७ ॥

क्व नु जलनिधिपुत्री यास्याति त्वां विनैषा
भूदयमधिगतां तां बिभ्रदेवाच्युत त्वम् ।
निजचरणसपर्यां प्राप्य किञ्चिद्यथेच्छं
पुनरपि विहरस्व श्रीसहायोन्तरेव ॥ ८८ ॥

यवनेश्वरतनया किं पदाब्जभवं विहाय ह्यधिशेते ।
तस्यै च सुप्रभातं परिपठ भगवन् विलज्जिता भवतु ॥ ८९ ॥

इति ॥

नारदः—

अध्यापकैरुद्घुष्यमाणां प्राबोधकीं स्तुतिमपि श्रुत्वा यादवाचलपतिर्झटिति समुत्थाय कृतभूतशुद्धिना स्वात्मविन्यस्तमन्त्रवरेणार्चकाग्रेसरेण विचिन्त्यमानां मानसीं पूजामङ्गीकृत्येदानीं बाह्ययागमप्यङ्गीकुरुते ।

आनर्घ्यमुक्ताश्रित एष विष्णु-
रर्घ्यं हि गृह्णाति न तद्विचित्रम् ।
निष्पाद्य लक्ष्मीमवति द्विजालि-
मस्मै कथं पाद्यमसौ ददाति ॥ ९० ॥

आचान्तस्सुस्नातोऽ[1]प्यनुलिप्तोऽलङ्कृतस्तुतो गीतः ।
नीराजितोऽच्युतोऽयं भुङ्क्तेऽद्य हविश्चतुर्विधं हृद्यम् ॥ ९१ ॥

इन्द्रः—

श्रुत्वा घण्टानिनदं धावन्तोऽद्योपयान्ति कुत एते ।
कटिवेष्टितोत्तरीयास्साञ्जलिबन्धास्तुतीः प्रकुर्वाणाः ॥ ९२ ॥

---

1. ह्यनुलिप्तो (ख)

नारदः—

त इमे भगवत्तीर्थाभिलाषेणाभिधावन्ति भागवताः ।

इन्द्रः—

तर्हि किं भगवन्निवेदितमपि इदानीमेव विनियुज्यते ?

नारदः—

इदानीमेवेतः पश्य, सर्वेऽपि भागवता उभाभ्यां पाणिभ्यां निवेदितं प्रतिगृह्णन्तो महाप्रसाद इति कूजन्ति ।

इन्द्रः—

(तदवलोक्य) अहो हविर्भोग्यता —

सौवर्णभाजनस्थं नव्यैर्गव्यैर्घृतैस्समासिक्तम् ।
मुद्गान्नमेतदुष्णं विष्णोर्भोज्यं सुदुर्लभं लोके ॥ ९३ ॥

नारदः—

इह पश्य रजतपात्रपरिकल्पितदध्योदनवैखरीम् ।

सद्यस्तननवनीतैस्सुभृतक्षीरैर्घनैश्च दधिखण्डैः ।
सैलानागरशकलैस्सिक्तं भक्तं हि शौरिणा भुक्तम् ॥ ९४ ॥

इन्द्रः—

(सम्पत्कुमारसंनिधिमवलोक्य) — किमत्र ?

स्वर्णैस्सवर्णसूपै प्राज्यैराज्यैरपूपवरनिवहैः ।
नानाव्यञ्जनजालैस्सहिता सहिताश्शाल्यान्नराशयो भान्ति ॥

नारदः—

माध्याह्निकाराधनोपभुक्ता इमे ह्यन्नराशयस्तदीयाराधनाय सज्जीकृताः ।

इन्द्रः—

किमासीन्माध्याह्निका[1]र्चनमपि ?

---

1. माध्याह्निकमर्चनमपि (ख)

नारदः—

तत्तदैवासीत् । प्रादोषिकार्चनसमयोऽपि पञ्चषघटिकान्तरितो भविष्यति ।

इन्द्रः—

तर्ह्यस्माभिस्तावच्छृङ्गाग्रमारुह्य प्रदोषे नरकेसरी सेयं इति सर्वैस्सह शृङ्गमधिरोहन् मार्गे जनसमूहमवलोक्य,

पाण्युद्धृतप्रदीपाकनकशलाकासु कीलितालापा ।
कैषा मन्मथयोषा सदृशी बालाजनैस्समायाति ॥ ९६ ॥

नारदः—

सेयं पुत्रलाभायैवं सेवां करिष्यामीति पूर्वं प्रार्थितवती तल्लाभ-सन्तुष्टाधुना नृसिंहं सेवितुमायाति ।

इन्द्रः—

(शचीमवलोक्य) अयि, त्वमप्येवं कलितवदना जयन्तमिवान्यं सुतं लभस्व ।

(शची समन्दहासमवनम्रमुखी बभूव)

नारदः—

(कर्णौ पिधाय) मुमुक्षुणा मया न श्रोतव्यः प्रार्थनाविचारः ।

इन्द्रः—(अन्यतोऽवलोक्य)

क इमे कतिचिन्मर्त्याः प्रतिसोपानं पदे पदे पृथुलम् ।
प्रहरन्ति नालिकेरं प्रणता भक्त्या प्रकृष्टगुणसान्द्राः ॥ ९७ ॥

नारदः—

त इमे प्राप्तारोग्या भगवत्सेवां कुर्वन्ति ।

इन्द्रः—

आरोग्यं भास्करादिच्छेदिति हि प्रसिद्धः । किमस्मादपि ऋच्छति ।

नारदः—

अयमेव हि भास्करान्तर्वर्ति स्वयं भास्वांश्च । तथा हि

पद्मोल्लासविधायि चक्रा श्लेषावहः करो यस्य ।
सोऽयं कथं न सूरः श्रीमाननिशोज्ज्वलप्रभायुक्तः ॥ ९८ ॥

इन्द्रः—

(साङ्गीकारं प्रतीचीमवलोक्य)

अत एव भास्करोऽयं स्वसान्निध्येऽपि नैजतेजोभिः ।
धुनुते तमो नृसिंहस्त्विति किं द्युतलाद्गतोऽद्य पातलाम् ॥ ९९

नारदः—

तर्हि शीघ्रमागच्छत । अन्यथा अतिक्रमिष्यति प्रादोषिकार्चनसेवा इति सर्वैस्सह नृसिंहसंनिधिं गत्वा साञ्जलिबन्धं,

संश्रितव्रातसन्त्राणयोगदीक्षामुपेयुषि ।
अशेषशेषिणेऽमुष्मै कस्मै चिज्जोतिषे नमः ॥ १०० ॥

(इति प्रदक्षिणीकृत्य प्रणम्येत्थं अस्तावीत्)

यदुभूभृत्कूटस्थः कुवलयसन्तोषकृद्विधुः श्रीमान् ।
अस्माकं राजा त्वं भासीह विभो सतां गुणैस्सेव्यः ॥ १०१ ॥

इन्द्रः—

सोऽयं गिरीशमौलो निवसंस्तनुते तमः क्षयं नित्यम् ।
योगिव्रजैकसेव्यो राजा न भवेत्कथं मुनेऽस्माकम् ॥ १०२ ॥

नारदः—

इतः पश्य महतीं गुहाम् ।

इन्द्रः—

कस्तत्र विशेषः ?

नारदः—

इमामेव हि गुहां पूर्वमधिष्ठितो नरकेसरी प्रह्लादप्रार्थितस्तदुपरि-शिलातलमध्यास्ते ।

इन्द्रः "तर्हि बिलं प्रविश्य पश्याम" इति सर्वैस्सह गुहां प्रविष्टस्तदा गाढान्धकारचकितया शचीदेव्या गाढमाश्लिष्टः कथञ्चिद्बहिर्निर्गत्य पुनः प्रणम्य भगवन्तमिममकथयत् ।

जनः कुदृष्टितां याति ह्यन्धकारिगुणाश्रयात् ।
मुक्ते तदाश्रये तेन हरिरेष प्रदृश्यते ॥ १०३ ॥

नारदः—

अहो अर्थान्तरमपि फलति तव वाणी । आगच्छतोर्ध्वं प्रासाद-प्रदक्षिणं करिष्याम इत्युपर्यधिरुह्य प्रदक्षिणीकृत्य अधस्तादवलोक्य, अहो पश्यताधः प्रदीपसहस्रं प्रवृत्तं पन्नगराजपीठोत्सवः संपत्कुमारस्य तत्तूर्णमागच्छते-त्यवरुह्य चतुष्पथमासाद्य प्रणम्येत्थमवादीत् —

कलिरेव द्विजिह्वानामनुकूलो हि वर्तते ।
दूरीकृतद्विजेन्द्रोऽयं यद्विजिह्वाश्रितो हरिः ॥ १०४ ॥

इन्द्रः—

किं भो भवानेव पुराणे कलिरत्र नास्तीत्युक्तवानिदानीमेवं कथयति ।

नारदः—

(प्रहस्य) श्लेषचातुरीमनालोचयन् किमेवं भीतोऽसि । शृणु श्लेषेणापि तव भीतिं वारयामि ।

अहीनोऽपि द्विजिह्वोऽयं हरिणाधः कृतः खलु ।
सदादृतप्रबन्धोऽपि द्विजेन्द्रौघः पुरस्कृतः ॥ १०५ ॥

इन्द्रः—

(सहर्षं पुरोऽवलोक्य) सत्यम्, प्रबन्धाध्येतारः पुरत एवागच्छन्ति । वेदपाठकास्तु पश्चाद्भागे । एवं च द्विजराजमण्डलमध्यस्थोऽयं भगवान् ।

नारदः—

किं भोस्तृतीयेऽहनि किलास्य द्विजराजमण्डलमध्यस्थता इदानीमेवोच्यते ।

इन्द्रः—

तच्छ्रुत्वा कदा द्रक्ष्यामीति विचिन्तयन् तृतीयरात्रौ चन्द्रमण्डलाधिरूढा भगवन्तमलोक्येत्थमस्तावीत् —

सूर्यश्चन्द्रोऽप्यक्षिणी मामकीने
तत्रैकस्मिन् पक्षपातो न कार्यः ।
इत्यालोच्य श्रीपतिर्यादवाद्रा-
वध्यास्ते किं बिम्बमप्यम्बुराशेः ॥ १०६ ॥

नारदः—

निष्पक्षपातं निजचक्षुषी द्वे
रमाप्रियो रक्षति पुष्पवन्तौ ।
तथापि चैकं नवनीतलाभ-
मन्यत्सुधालिप्तमहो वदन्ति ॥ १०७ ॥

इन्द्रः—

अहो सभङ्गश्लेषचमत्कारः । निबिडवनप्रदेशे सूर्यरश्मिः न प्रसरति । ततो नवनीतलाभत्वं सूर्यस्योचितमेव । पश्येदमप्याश्चर्यम् —

लोके ह्युडुपारूढान् लोकांस्तारयति नाविकव्रातः ।
अयमुडुपारूढस्सन् तद्द्रष्टॄनपि बताद्यतारयति ॥ १०८ ॥

अपि च,

हरिणैवं चन्द्रबिम्ब उत्सवे यदधिष्ठितः ।
हरिणा कलितं चन्द्रं वदन्ति कथमन्यथा ॥ १०९ ॥

अन्यच्च,

दोषाकरः कलङ्की सद्वसुहर्ता गुरोस्सतीजारः ।
तमपीह कलयतीशस्त्रीसम्बन्धात्स कस्य वोल्लङ्घ्यः ॥ ११० ॥

नारदः—

द्विजराजवाहनोऽसौ द्विजराजोऽयं सुधाकरः श्रीमान् ।
अत एव वाहनत्वं वाह्यत्वं चानयोः किल स्थाने ॥ १११ ॥

इन्द्रः—

लोके कलङ्काकलितो जडोऽपि श्रीमान्यदि स्याद् द्विजराजतावान्
पादामृतं तस्य पिबन्ति योग्या हरिश्च तस्मिन्ननु संनिधत्ते ॥

नारदः—

श्रीसन्बन्धमहिमा भगवतैवातितरां ज्ञातः किल । अत एव हि 'सः शूरस्स च विक्रान्तोऽयं त्वं देवि निरीक्षस' इति स्तुतवानसि ।

इन्द्रः—

सर्वतोऽवलोक्य, अहो अद्यैव देशान्तरागतजनैर्निबिडतमोऽयं गिरिः कथं श्वः समागमिष्यमाणानामप्यवकाशदः स्यात् ।

नारदः—

पुष्पकवदस्मिन् गिरौ सर्वेषामप्यवकाशस्सिध्येत् । तथा हि—

पुण्यजनेडितमहिमातुलसीतारामसंश्रितः कविभिः ।
पूर्णो गगनतोऽयं पुष्पकवद्भाति यादवक्ष्माभृत् ॥ ११३ ॥

इन्द्रः—

इतः पश्य देवोऽयं विधुमण्डलादवरुह्य मन्दिरान्तः प्रविशति । विधुरपि गगनात् पश्चिमार्णवम् ।

नारदः—

तर्हि वयमपि स्नात्वा समागमिष्याम इति दर्भतीर्थमासाद्येत्थमकथयत्—

विलसत्येतत्तीर्थं तटवनमप्यस्य सत्कुशाकलितम् ।
सन्त्यक्तकुशपथोऽपि श्रीमानत्राहरत् कुशं पूर्वम् ॥ ११४ ॥

शाण्डिल्यमुखसरो पीत्वा श्रीपाञ्चरात्रमकरन्दम् ।
चापल्यतः किमस्मिन्नमृतयैवादरात्तपस्यन्ति ॥ ११५ ॥

इति तत्र सर्वैस्सह झटिति विधायाह्निकं पुनर्मन्दिरान्तः प्रविश्य, अहो प्रातरेव भगवान् सम्पत्कुमारो मण्डपसेवामङ्गीकर्तुं बहिर्निर्गतः । पुनरत्रैव समागमिष्यत्यस्मिन् रामानुजमन्दिरं स हि वज्रमकुटीधारणं भविष्यतीत्यकथयत् ।

इन्द्रः—

(सकुतूहलं) भो मुनीन्द्र ! कथमेतद्वज्रमकुटीप्रभावः ? पदे पदे श्रुतोऽपि पुनः पुनः शुश्रूषामेव जनयति ।

नारदः—

(सहर्षं) तर्हि श्रुणु, समाहितोऽस्य माहात्म्यमिति प्रणम्य नरनारायणं तदुपदिष्टं तत्प्रभावं कथयितुमुपचक्रमे । तथा हि—

पुरा किल सुराधिपनिराकृतिपरासुरवरा श्रुतपातालमध्यमध्यासीनोऽपि निखिललोकभयङ्करः कोप इव मूर्तिमान्, काम इव चक्षुर्गोचरः, आमय इव साकारः, जन्मार्जित दुरितनिचय इव सङ्गमः, जगदुपद्रव इव संभाषमाणः, संमोह इव सविग्रहः, पतङ्ग इव पक्षपाती, पावक इवाश्रयः, पिक इव मधुसमयनिरीक्षकः, पीठभाग इव सज्जनाधः कृतः, पुष्पनिवह इव मधुपैरनुसृतः, पूतिगन्ध[1] इव सदामोदक्षतिकरः, पेटिकाप्रकर इव दारुणाकलितः, पैशाचगण इव निशाचरः, पोत्रीव क्षमाक्षतिकरः, पौलस्त्य इव सदालङ्कापुरुषसंश्लाघितः,

1. प्रतिगन्ध इव (ख)

पङ्कुरिव विपदाश्रयः, पश्चिमगिरिरिव पतिष्णुमित्राश्रितः, प्रोज्झितविनयः, प्रह्लाद-तनयः क्रूरविलोचनो विरोचनो नाम महासुरो दुर्मन्त्रिभिरित्थं आलोचयामास।

वेधा वृथा जीवितान्नः किमर्थं समजीजनत्।
यैः संश्लाघ्यं यशः किञ्चिदपि नैवार्जितं स्थिरम्॥ ११६॥

मन्त्रिणः—

असकृदमी विबुधगणाः स्वर्गादुत्सारितास्त्वया देव।
सुरक्षितास्स्वकीया बहुशः किमुतोऽस्ति सद्यशो लोके॥११७॥

विरोचनः—

भो सचिवाः! किममरपशूनां स्वर्गगोष्ठादुत्सारणमप्येकं यशः। मदवारणकुम्भनिर्भेदनपटीयसः पञ्चाननशशनिवहनिर्दलनमिव साधुनिरूपित-मस्मन्मनानुगुणं यशस्तत्र भवद्भिः।

मन्त्रिणः—

(सभयोत्कम्पं) भो स्वामिन्! जगति कस्तादृशः तव प्रतियोद्धा? दनुजसिंहस्य भवतः सर्वेऽप्यमराश्शशशिशुप्राया इव।

विरोचनः—

किमेवं ब्रूथ। अस्ति हि मम पितामहविरोधी पीताम्बरः।

मन्त्रिणः—

सोऽपि भवतश्शशकप्राय एव यत्स्वामिनः पितामहेनैव बहुधा कदर्थितो दैवान्मृतस्य तस्य वधापराधचकितो भवदीय प्रचण्डदोर्दण्डविक्रममपि समाकर्ण्य स्वप्नाधिपोऽपि स्वापव्याजेन तूष्णीं श्वेतद्वीपमध्यमध्यास्ते।

विरोचनः—

सत्यम्। तथापि मदीयतातपातकेन पैतामहं यशः। प्रणाशितं किल।

किं जातो मम तातः करिणीगर्भाद्धि लण्डपिण्ड इव ।
यो नैजतातहन्तुश्चरणं[1] शरणं गतोऽनु निर्लज्जः ॥ ११८ ॥

मन्त्रिणः—

हे देव, किं तं स्मरस्यसुराधमम् ?

न स्मरणीयस्सोऽयं रक्षः क्षयकृच्च रावणावरजः ।
यत्प्रस्तावेऽस्माकं मूर्धा भवति ह्यवाङ्मुखस्सदसि ॥ ११९ ॥

किञ्च,

पङ्काद्म्बुजवत्त्वं जातो सुरसार्वभौम सकलान्नः ।
आमोदयसि च नित्यं पङ्कं त्याज्यं हि दूरतो लोके ॥ १२० ॥
विष्णुरपि ते समः किं तदपि श्रद्धास्ति चेज्जये तस्य ।
सोऽयं हिरण्यहर्ता शिक्ष्यः प्रभुणा त्वयाद्य दितिजेन्द्रः ॥१२१॥

विरोचनः—

तदेव मे मनसि चिराद्वर्तने । कथं तज्जयोपायः ?

मन्त्रिणः—

'शुनस्सन्ताडनाय चित्रदण्डान्वेषण'मिव किमु तत्राप्युपायश्चिन्तनीयः स्वामिना ? स किल भवद्दोर्दण्डविक्रमश्रवणमात्रचकितस्समुद्रदुर्गमधिशेते । भवांस्तु रावण इव रूपान्तरमासाद्य तत्सकाशमधिगम्य तद्भूषणायुधदेवीवर्गेष्वन्यतमं बलादाकृष्य समानयेदं पातालम् । तदनुप्रबुद्धस्तदन्वेषणपरो राम इव वानरभल्लूकशशकमशकमण्डूक[1]डुण्डुभादिष्वन्यतमान् परिवारान् संपाद्यात्रागमिष्यति । तदानीमत्रैव कारागृहे स्थापयिष्यामोऽथवा भवत्पितामहपदवीमानेष्याम इति विज्ञापयामासुः ।

ततो विरोचनो 'साधूक्तं सचिवैः अस्मन्मनोनुकूलमेवे'ति झटिति समुत्थाय द्विजरूपमाससाद ।

---

1. नैजतातं चतुश्चरणं (?) ख.

विमलोर्ध्वपुण्ड्रशाली विलसितचक्राब्जशोभिभुजमूलः ।
पद्माक्षमालिकाढ्यः प्रह्लादसुतस्ततः प्रतस्थे च ॥ १२२ ॥

यज्जन्मवैष्णवोऽसौ प्रह्लादमुनिस्तदस्य तनयोऽयम् ।
द्वेषान्वितोऽपि विष्णौ वैष्णवरूपं गतस्तदायुक्तम् ॥ १२३ ॥

स हि गच्छन्नेव पथि ध्वजमधिरूढं द्विजेन्द्रमद्राक्षीत् ।
यो भाविमकुटचौर्यं ज्ञातुमिवाभाति सूनते स्थाने ॥ १२४ ॥

पुनस्सुदूरगमनानन्तरं सन्ददर्श च निजमध्यगतपुण्डरीकाक्षवक्षः पीठमधिगतायाः पङ्कजवासिन्यास्तनुयष्टिसौन्दर्यविजिगीषया श्वेतद्वीपमभितोऽवस्थितैरिव विद्युल्लताषण्डैः विद्रुमकाण्डैर्विभूषितं अन्तर्ज्वलद्वडबानलज्वालाभितप्यमानत[2]येव सघोषमुत्सर्पयन्तीभिर्वीचिकाभिरभिशोभितं अतिनिर्मलनिजगर्भान्तर्गततया बहिस्सुव्यक्तं प्रस्फुरद्भिरिव कल्पान्तरोपास्यमानकल्पवल्लीजलैश्शैवलैस्समावृतः पूजानन्तरमप्सु प्रक्षिप्तः पन्नगशायिभुक्तोज्झितैरिव पारिजातकुसुमैर्डिण्डितखण्डैः परिपूरितं निजोदरसंलग्नैरुपरि भगवत्सेवार्थमागच्छद्वैमानिकनितम्बिनी प्रतिबिम्बैस्समन्विततया अद्यापि सृजन्तमिवाप्सरोगणं निजतनयां नीरजवासिनीं परिगृह्य परमपुरुषस्सद्यस्वकीयवक्षः पीठमधिरोप्य समुद्वहन् श्वेतद्वीपमङ्गलवेदिकामध्यमध्यास्त इति कुतूहलेनेव विविधरत्ननिचयं वीचीहस्तैर्वितरन्तं विबुधेभ्यः तीरवासिभ्यः निजगर्भोत्पन्नधन्वन्तरिनिहितैरिव औषधकरण्डैश्शुक्तिकाषण्डः परिमण्डितं कालान्तरोद्भविष्यत्सुरकरटिकबलप्रदानाय सम्पाद्य संस्थापिताभिरिव पुण्ड्रेक्षुवल्लीभिः कमलिनीलताभिः परिकर्मितं सर्वत्र प्रसरद्भिरिव पयोजवासिनीप्राणकान्तविग्रहकान्तिप्ररोहैः कुवलयनिवहैः परिशोभितं अतिनिर्मलगर्भगततया बहिप्रकाशमानैरिव भविष्यदुच्चैश्रवस्तनुगतावर्तैः गभीरावर्तैः संलक्षितं महारण्यमिव श्वेतद्वीपिताश्रितमध्यभागं उद्यानवनमिव कमलादिसमन्वितहृच्छयाक्रान्त हृदयभुजङ्गाधीशभोगप्रसरणानुकूलस्थलाभिरामं, नन्दनवनमिव हरिणान्यत्रानीत निजगर्भगतपारिजातं चैत्ररथोद्यानमिव पद्मशङ्खवरमकरकच्छपनिषेव्यमाणम्,

1. वानरभल्लूकडुण्डभादिषु (ख) 2. तप्यमान एव

सकुन्दनीलालकाश्रितमुकुन्दाधिष्ठितमध्यभागं च, बृन्दावनमिव स्वकुक्षिसञ्जात पुन्नागम्, विन्ध्यारण्यमिव निजगर्भसम्भूतौषधीशताभिरामम्, मलयवनमिव सुरभिजनकम्, भगवन्मुखमिव हरिहयोत्पत्तिस्थानं मुनिजनमनोहरं पयः-पारावारम् ॥

निजपुत्रीमन्यत्रानेतुं जामातुरनवकाशार्थम् ।
आवृत्य वर्तते यस्या[1] विरहासहिष्णुरिव वार्धिः ॥ १२५ ॥

अथवा

लक्ष्मीं लब्ध्वा सिन्धोः पुनरपि कल्पान्तरे भविष्यन्तीम् ।
श्रीमान्निरीक्षमाणो गजोपर्येव यस्य किं शेते ॥ १२६ ॥

अद्राक्षीच्च तन्मध्यतो[2] नित्यमुक्तासक्तचिन्तेन तरणिमण्डलस्थेन भगवता सिन्धोस्संगृह्य निजलोकमानेतुं एकत्र पुञ्जीकृतमिव मुक्ताराशिं रक्षणार्थं तदुपरि-निखिलभयङ्करपन्नगेश्वरं प्रतिष्ठाप्य तत्राप्यविस्रंभात्तमधिशयितेन स्वेनैव रक्ष्यमाणं च तथा तेनैव स्वपरिवाराणां असंख्यातानामप्येकैकं निजलाञ्छनं प्रदातुं संगृहीतमिव धवलशङ्खराशिं देवदेवमभितो देवताभिर्वर्षितमिव पारिजातकुसुम-राशिं निरन्तरमन्दिरामुखचन्दिरान्तरनिस्सरन्मन्दहासचन्द्रिकाविकसितमिव कुमुदवनं द्वीपान्तरमानेतुं महतीं नौकामधिरोपितमिव घनसारनिकरब्रह्मादिभि-र्दुरवापं श्वेतद्वीपम् ॥

अथ विविधोपायचतुरो विरोचनो विनयान्तरदुष्प्रवेशमिदं स्थानं मया मायाशतेनापीति निश्चित्य तत्र गतागतशालिनः कांश्चिद्भागवतान् देवर्षीन् अनुसरन् तदनुरूपवेषभाषादिभिरन्वितः तैस्सह द्वीपान्तः प्रविश्य तत्रान्य-भागवतानाश्रित्य स्नानसरोवरतटीमासाद्य कृतकृत्यः तत्र प्रातरागतानां तेषां शास्त्रीयदन्तकाष्ठादिस्नानोपकरणान्याहृत्य समर्पयन् स्नानान्तरं तद्विसृष्टान्यार्द्र-वस्त्राण्युभाभ्यां पाणिभ्यामादाय निजमूर्ध्नि निधाय धन्योऽस्मीत्यनुगृहीतोऽस्मीति

1. यः तस्य (ख) 2. तन्मध्यगतो (ख)

समुच्चरन् तान्यतिनिर्मलं निष्पीड्य समर्पयन्, कस्त्वं भागवतपरिचर्यारतोऽसि, किं भगवत्सेवामधिगतोऽसि वेति तैः पृष्ठे 'भवद्भ्योऽन्यः को भगवान्' इति वदन्, कदाचित् तैर्हस्तग्राहं गृहीत्वा महत्या प्रीत्या भगवद्दर्शनार्थमन्तः प्रविशतोऽपि 'नोद्देश्यं मम तद्दर्शनं तदीयचरणाब्जसेवयैव कृतार्थोऽहम्' इति बहिरेव निर्गत्य प्रधावंस्तेषां तुलसीवनान्यासाद्य निरवधिकक्षीरपूरितानि तदालवालानि विरचयन्, शिथिलानि आलवालानि कुद्दालकोद्धृताभिर्मृद्भिरुद्दामयन् कदाचित्तत्र कुसुमापचयार्थं प्रह्लादे समागते स्वयं निकुञ्जान्तर्निलीय कालं क्षिपन् क्रमेण द्वारपालजनान् पादसंवाहनादिभिः वशीकुर्वन् कुमुदादिसेनानायकान् अवलोक्य दूरत एव मुहुर्मुहुः प्रणमन् सर्वेषामपि साञ्जलिबन्धं निजदन्तपङ्क्तिं प्रदर्शयन् पादतीर्थं दासाय प्रदानमिति प्रार्थयमान एवमादिभिर्नानाविधप्रतारणव्यापारैस्तेषां दयां सम्पादयन् कदाचन कयादु[1]नन्दने अहोबिलयादवाचलमङ्गलगिरिप्रभृतिपुण्यस्थलेष्ववतीर्णं नारसिंहं द्रष्टुं जम्बूद्वीपं प्रति प्रस्थिते समयोऽयमद्य मामकीनभाग्यपरिपाकस्येति कुतूहलं भजन्नतिपरिचयाद् द्वारपालानां निःशङ्कमन्तः प्रविवेश। अपश्यच्च तत्र कैलास इव कालमेघं (?) तुहिनाचल इव तुलसीवनं स्फटिकपर्वत इव स्फुरत्पाकशासननीलशिलाशिखरं पुण्डरीकवन इव पुष्पंधयनिवहं कुवलयबन्धुमण्डल इव कलङ्कनिर्झरतरङ्गिणीझर इव नीलोत्पलदलं निरन्तरश्वेतद्वीपवासान्नित्यक्षीरपानाच्चैव निर्मलतनुं भोगिराजमधिशयानं कलशार्णवानीतपाद्योदकसमर्पणसमयसंलग्नैरिव क्षीरबिन्दुभिर्विधिपाकशासनप्रभृति विबुधाधीशव्रातवन्दनावसरसंमर्दसंभूतसंघर्षणगलितैः कुङ्कुमपङ्कानुलेपनार्द्रतया संसक्तैरिव तत्किरीटमुक्तामणिभिः कमलावसुन्धरयोः अङ्कगततया तदीयकुचकलशनिष्पतितसंलग्नैरिव घनसारचूर्णैः नखरैर्विराजमानपादयुगलं तत्र निपीतदुग्धपूरतया निर्मलेषु मेघजालेषु रिक्तगर्भताभ्रान्त्या तान्विहाय शतमखमणिरोचिषि निजवपुषि नव्याम्बुदभ्रान्त्या सङ्घीभूय संसक्तेनेव[2] विद्युन्निकुरम्बेण पीताम्बरेण

1. कयाधु (ख) 2. सुसंक्तेनेव (ख)

करम्बितकटितटं 'पितायं मम पन्नगाधीशमधिशेते माता च तत्कोमलतापदेश-कृष्णभुजङ्गशीर्षमध्यास्ते मयापि कश्चन फणीश्वरो लब्धश्चेत् तमधिवसेयं' इति चिन्तयतश्चतुर्मुखस्य सन्तोषणार्थं सृष्टं नाभीवल्मीकं कुहरोद्गतं विवृतफणं पाण्डुरमिव कुण्डलीपोतं पुण्डरीकमधिवसतः कमलासनस्य शिशोः कदाचि-च्छयनोरगदंष्ट्रास्पर्शे झटिति विषपरिहरणार्थं जगन्मात्रा स्वसविधनिहितेनेव गारुत्मतरत्नेन श्रीवत्सेन तत्र निरन्तरलक्ष्मीसांनिध्यार्थं संस्थापितेनेवाखण्डदीपेन कौस्तुभरत्नेन च देदीप्यमानवक्षःस्थलं चतुराननस्य शिशोश्चत्वार्यपि मुख-कमलानि युगपद् गृहीत्वोपलालयितुं इव चतुर्भुजतां भजन्तं सर्वज्ञताजनितया कोऽपि मदीयममोघं किरीटमपहरेदिति भियेव स्वकिरीटाधस्तादुपधानीकरण-व्याजेन निजदक्षिणहस्तं विन्यसन्तं गजेन्द्रान् आर्तभक्तरक्षणार्थं त्वरया पादसञ्चारं कृतवतो मम जानुपर्यन्तं पादसंवाहनं कार्यमिति पादोपान्तगत कमलावसुन्धरयो सूचनायेव निजवामभुजमाजानुप्रसारयन्तं सुप्ते मयि मदीया-नामसुरबाधा भविष्यति चेत्तदा तन्निग्रहणमविलम्बेन कार्यमिति कुतूहलेनेव निद्रावसरेऽपि पश्चाद्भुजाभ्यां धार्यमाणसुदर्शनपाञ्चजन्यं पयःपारावार-प्रतिबिम्बितेनेव पार्वणचन्द्रबिम्बेन कुन्दसन्दोहमन्दाक्षावहमन्दस्मितचन्द्रिका-तुन्दिलवदनारविन्देन वन्दारुबृन्दारकबृन्दस्यामन्दमानन्दं सन्दुहानं बडबानल-निपीयमानसलिलकलशजलनिधिपूरणायेव नयनकमलाभ्यां कटाक्षामृतझरी-मभितः किरन्तं तुलसीमालिकोल्लसत्तिलकालकं कुण्डलिनमपि रत्नावतंसितकर्णं सुभ्रुवमपि पुरुषोत्तमं निजैकैकरत्नकान्तिमन्त्रविजितविरोचनसहस्रमपि विरोचनापहार्यं वज्रमकुटमाबिभ्राणं अनन्तकल्याणगुणगणं नारायणम् ॥

अथ विरोचनः चोर इव सर्वत्र दृष्टिं प्रसार्य समयोऽयं समीचीनः सुकृतिविशेषाल्लब्धो मया यदिह योगनिद्रां भजति भगवान् वासुदेवः। ततस्तत्परिवारा अपि बहवो बहिर्निर्गताः। केचिन्नियतमत्र समासीना अपि चित्रार्पितप्रतिमा इव निश्चलध्यानवशात् निमीलितलोचनाश्च भवन्ति। किं तु द्विसहस्रलोचनोऽयं द्विजिह्वाधिपोऽत्र जागर्ति। कियद्दूरं कुत्र कुत्रास्य दृष्टिः

प्रसरति तदप्यधिगन्तव्यं मया विनयेनेति नट इव कपटभक्तिमुद्वहन् पटेन कटितटं समावेष्ट्य च्छिन्नमूलद्रुम इव भूमौ निपत्य सहस्रकृत्वः प्रणम्य एते प्रणामाः कार्यसाधनानन्तरं पलायनानुकूलतनुलाघवसम्पादका इति मनसि तत्सार्थकतां विचिन्त्य बहुशः प्रदक्षिणपरम्परां वितन्वन् समन्ताद्विद्यमानानां द्वारपालादीनां गतिमप्यवगत्य भगवत्पादाब्जसमीपवन्दनव्याजेन शेषभोगं हस्ताभ्यां अभिस्पृशन् अहो वृथा भीतोऽस्म्यहम् अस्मात्पन्नगेश्वराद्ययं सुखसुप्तस्य भगवतो निःश्वासरूपेण नासावंशविनिर्गतश्रुतिमधुरपुराणवाणी श्रवणदत्तदृष्टिः तदानन्दपारवश्यादन्यन्न किञ्चिदपि जानाति। इमे श्रीधरण्यौ तु पत्युः पादाब्जयुगलसंवाहनार्थं परस्पराभिमुखं नागभोगमध्यासीने सापत्न्यमात्सर्यात् परस्परसौन्दर्यभूषणानुलेपनदुकूलमालिकाद्युत्कर्षापकर्षपरीक्षायां दत्तदृष्टी भवतः। अतस्ताभ्यामपि न मेऽस्ति भीतिलेशः। यद्येकेवेयं लक्ष्मीर्धरणिर्वास्ति तदा पुलस्त्यनन्दनवत् प्रथमामहरेयम्। उभयोस्सामानाधिकरण्यादिदानीं नास्त्यवकाशः। अस्तु लप्स्यते कदाचित् सदवकाशोऽपि। प्रकृते त्वस्य किरीटमपहार्यमिति निश्चित्य तत्रत्य नित्यसूरिभिस्सह स्वयमपि बद्धपद्मासनोऽर्धनिमीलितलोचनो भक्तवन्निश्चलाङ्गो भूत्वा निरीक्षमाणः समयं कदाचन हटादपहृत्य भगवतः किरीटं स्वयं नक्ररूपमङ्गीकृत्य समुद्रान्तःप्रविष्टः क्षणमात्रेण पातालमनीनयत्॥

तदा सर्वेऽप्यसुरपुङ्गवाः समासाद्य विरोचनम् 'भो पुण्यजनेश्वर! किमिदं निखिलमपि पातालान्तरालमधिधरण्यरुणोदय इव प्राचीमुखं प्रकाशयति। किं पद्मनाभस्य कौस्तुभरत्नमेवानीतं उतान्यद्वेति पप्रच्छुः॥

एवं पृष्टः पह्लादतनयः स्वकरचालनसंज्ञया तूष्णीं तिष्ठतेति निरूप्य निजसचिवप्रभृतीन् कतिपयान् यातुधानाग्रेसरान् अन्तःपुरान्तस्समानीय निखिलान्यपि कवाटानि बद्ध्वा वातायनान्यपि नीरन्ध्रं पिधाय स्वकक्षविनिहितं किरीटं तेषां दर्शयितुमुपक्रममाणः पुनः सभयोत्कम्पं सचिवमामन्त्र्य 'पद्माक्षप्रक्षपाती पन्नगराजः किं करोति। तथाविधः कपिलमुनिनाथश्च

किमाचरति । शीघ्रं विज्ञाय समागच्छते'ति संप्रेष्य, 'किं कुर्मो निष्कण्टकं न किमपि स्थानमस्ति अस्माकं' इति सञ्चिन्तयन् भूभारोद्वहनवशादधोविसारि शिरोरुधिराविलेक्षणः पन्नगरमणः पुरोगतमपि मां न ज्ञातवान्, तपः परतन्त्र-कलेबरः कपिलो मया वन्दनव्याजेन पादयोः संसृष्टोऽपि नावबुध्यते । ततो न किञ्चिदस्ति भयमिति झटिति पुनरागतेन सचिवेन निवेदिते तद्वृत्तान्ते पुनस्सधैर्यमुत्तरीयमपोह्य प्रदर्शयामास प्रभाकरसहस्रप्रतिभटं वज्रमकुटम् ॥

दृष्ट्वा किरीटमतुलं हृष्टाः पुष्टाश्च विस्मयाविष्टाः ।
बलिमायामयपुरोगा जहर्षुस्सर्वेऽपि पूर्वगीर्वाणाः ॥ १२७ ॥

ततो मयस्तत्किरीटमादाय तद्बिलान्तरालमङ्गुलिसङ्ख्यया परिगणय्य किञ्चिन्न्यून-द्वात्रिंशत्सहस्रयोजनपरिमितत्वादस्य बिलस्य सार्धद्विलक्षयोजनपरिमितयामः पुरुषोत्तम इति ज्ञायत इत्यवोचत् ॥

विरोचनः—

अस्ति तव शिल्पगणनाचातुर्यम् । किमेवं विधं भूषणं भवता कर्तुं शक्यम् ?

मयः—

न मया कर्तुं शक्यं भूषणमेतादृशं न च त्वष्ट्रा ।
सृष्ट्वापि किं विधातुं शक्तो भविता शरच्छतेनापि ॥ १२८ ॥

विरोचनः—

(सानन्दं) अपि एतत्किरीटरक्षणार्थमेका पेटिका वा क्रियते ।

मयः झटिति महतीं पेटिकां विरचय्य समर्पितवान् । विरोचनः बलिमाहूय, 'वत्स ! किं भवन्मूर्ध्नसमप्रमाणं भवत्येतद्भूषणं पश्य, कुरु च धारणमित्यचोदयत् ।

स तु मकुटीं बाहुभ्यामाश्लिष्यानुच्छ्वसन् स्वादूर्ध्वम् ।
द्व्यङ्गुलमप्युद्धर्तुं न शशाक ततो बभूव धृतलज्जः ॥ १२९ ॥

विरोचनः --

वत्स, त्यज लज्जाम्, क्रमेण शक्तो भविष्यसीत्युक्त्वा, वीराग्रेसरान् कतिपयानसुरानाहूय "भवन्त एतत्किरीटमुद्धृत्य कुमारस्य मूर्ध्नि निवेशयन्तु" इति सादरमाज्ञापयामास। ततोऽसुरा बहवस्सङ्घीभूय मन्दरमिव समुद्धृत्य कथञ्चित्तन्मूर्ध्नोपरि स्थापयामासुः। सपदि तस्मिन् किरीटे निरर्गलतया भूमौ निपतिते तद्बिलान्तरालगतो बलिः भृशमुद्विग्नो विचुक्रोश। तदा सर्वेऽप्यसुरेषु भयकातरेषु समुद्धर्तुं किरीटं समुद्धृतेष्वपि किरीटान्तःपुरकुट्टिमयोर्मध्ये नीरन्ध्रतया अङ्गुलिप्रवेशस्याप्यनवकाशाद्व्यर्थसाहसेषु 'गमिष्यन्ति मम प्राणाः। कियन्तं कालं अहं निरुद्धानिले किरीटबिले वसेयम्' इति बलौ बलवत्तरं प्ररुदति रोषपरिभ्रमद्विलोचनो विरोचनो स्वयमेवोद्धृतकिरीटं 'बाणः समाहूयतां पृथुलविग्रहस्य सहस्रबाहोस्तस्योचितोऽयं किरीटः' इत्युक्त्वा 'स्वामिन्! अधिधरणि मधुरामधिवसता केनचिद्गोपालबालकेन कालगत्या शुनकेनेव शुण्डालरिपुः जरासन्धः पराजित इति वृत्तान्तमाकर्ण्य तत्सहायार्थं क्षोणीमधिगतः बाण' इति विज्ञापिते सचिवैः हस्ततलेन स्वशिरस्सन्ताडयन् 'किं मूषकसंहाराय मृगाधिपगमनमिव अनुमतं भवद्भिः। तद्गमनमस्तु। तदागमनपर्यन्तं पेटिकायां संरक्ष्यतामिदं मकुटम्' इति आज्ञापयामास॥

ततस्तावदत्र श्वेतद्वीपेऽपि प्रभातपठनीयां प्राबोधकीं स्तुतिं तुम्बुरुणा सह गायन् भगवतस्सन्निधिं आसाद्य तं आपादान्मौलिपर्यन्तं स्तुतिभिर्वर्णयन् निर्वर्णयंश्च तत्तदङ्गभूषणादीनि प्रत्यहं सन्दृश्यमानं वज्रमकुटमदृष्ट्वा भीतोऽहं झटिति विष्वक्सेनसंनिधिं गत्वा इममर्थं असूचयम् (?)। सोऽपि हठादुत्थाय विसृज्य सर्वपरिवारान् अन्तःप्रविश्य, विलोक्य भगवन्तम्, विस्मितो भूत्वा चण्डप्रचण्डादीनन्तःपुरद्वारपालानाहूय, 'रात्रौ भगवान् कदा समुत्थितः? किमकरोत्? किमभाणीत्? पुनः कदा प्रसुप्तः?' इति पृष्ट्वा, 'न जानीमो

वयं किमपि कदापि न प्रबुद्धः सति प्रबोधे[1] भगवत्संनिधौ विज्ञाप्यते न किमस्माभिः' इत्युक्ते, कोशागारपालानाहूय 'रात्रौ किं किं भूषणं भगवते समर्पितम्? किं पुनः कोशमानीत'मिति विचार्य, 'न कोऽपि विशेषः' इति तैरपि विज्ञापिते सविनयमम्बुधितनयासंनिधिं गत्वा दूरतः प्रणम्य प्रह्वीभूय भूतलमवलोकयन् हस्ततलाग्रेण वदनमपिदधन्, अम्ब! स्वामिनः किरीटं न पश्याम इति विज्ञाप्य, तयापि विस्मयवत्या 'नाहं जानामि' इत्युक्ते पक्षिराजं पृष्ट्वा तेनापि तथोक्ते सरोषं हुँकुर्वन् नखाग्रैः स्मश्रूणि समुन्नमयन् 'अस्तु क्षणमात्रेण किरीटं समानेष्यामि' इति बहिर्निर्गत्य विविधोपायश्चतुरश्चतुरो निजमन्त्रिणस्समाहूय तैरालोचयन् अन्तःस्थिता नित्यमुक्तभक्तवर्गाश्चामरग्राहिण्यो[2] लक्ष्मीधरण्योः परिवारचेटीजनाश्च सर्वेऽपि निरवशेषमत्रानीयन्तां इत्याज्ञाप्य आनीतेषु निजभटैस्सर्वेषु तर्जनीं प्रचालयन् तान्सर्वानपि प्रत्येकमेकैकशो दूरे दूरे संस्थाप्य एकैकस्य परितश्चतुरश्चतुरो विकोशखड्गधरान् भटवीरान् संनिवेश्य 'एते परस्परं सम्भाषमाणाश्चेत्पुनर्ममाज्ञां विनैव जिह्वाच्छेदः क्रियताम्' इति निजसेनापालकान् नियोज्य पुरद्वारपालान् क्षेत्रपालांश्चाहूय, 'अस्मात्पुरात् द्वीपाद्वा बहिः किमपि प्राणिमात्रं अविमुञ्चन्तः सर्वानप्यन्तरेव निरुन्धन्तो भवत' इति समाज्ञाप्य तत्तद्द्वारगणकानाहूय 'पूर्वं पञ्चषदिनान्यारभ्य अत्र के के समागताः? के के बहिर्गताः? तान्सर्वान् पृथक् पत्रेषु पङ्क्तिशः सुस्पष्टं समालिख्य शीघ्रं समानयत' इति चाज्ञाप्य स्वयमेकं मुहूर्तं निजनासाग्रन्यस्त तर्जनीको मुहुर्मुहुश्शिरस्सञ्चालयन् पदे पदे हुँकुर्वन् चित्रार्पितप्रतिमा निर्विशेषाणां निजसचिवानां मुखान्यवलोक्य 'कथमेतत्प्रतिभाति युष्माकम्' इति पप्रच्छ। तदा गजाननः,

पत्युर्द्वयोस्समानां प्रीतिं रोद्धुं श्रिया धरण्या वा।
कृतमेतदन्यथान्यः कः शक्नोतीह साहसं कर्तुम् ॥ १३० ॥

---

1. तीव्रबाधे भवत्संनिधौ (ख) 2. चामरग्राहिभ्यो (ख)

जयत्सेनः—

भुजगेन्द्र पक्षिराजावपि ननु जात्या निबद्धविद्वेषा ।
अभिनीतमित्रभावावपि मे विशयस्तयोश्च तादृक्षः ॥ १३१ ॥

सिंहवक्त्रः—

भक्ता भुक्ता वा तेषां हृदयं कथं विजानीमः ।
मणिमौक्तिकेषु तेषामाशाविरमेज्जगत्त्रयेऽप्यस्मिन् ॥ १३२ ॥

कालप्रकृतिः—

वयं भक्ता वयं मुक्ता इति नानादिगन्तरात् ।
अज्ञातवदना लोका आयान्त्यत्र सहस्रशः ॥ १३३ ॥

तैस्साकमसुरा गूढरूपा आयान्ति चेदिह ।
ज्ञायते कथमस्माभिस्तत्रापि विशयो मम ॥ १३४ ॥

इत्येवं सचिववचनविकल्पजातमाकर्ण्य सेनाग्रणीस्तूर्णमुत्थाय, 'प्रथमविकल्पमादौ परीक्षयामि' इति अन्तःप्रविश्य लक्ष्मीं प्रणम्य साञ्जलिबन्धं 'अम्ब ! बहुशोऽन्विष्टमपि न कुत्रापि लब्धं किरीट'मिति व्यजिज्ञपत् ।

लक्ष्मीः—

वत्स ! ऋजुबुद्धिर्भवान् सर्वानपि ऋजुमतीन् जानाति । यतोऽहं प्रत्यहं पुण्डरीकाक्षवक्षः पीठमधिवसामि । ततो महतीमसूयां भजन्त्या मत्सपत्न्या किरीटसंनिहितायां मयि कलङ्कमारोपयितुं मम सुखस्वापवेलायां कृतमेतच्चौर्यं अन्यथा भवादृशोऽन्यो निशीथिन्यां भगवत्पार्श्वद्वयेऽप्यावयोस्सपत्न्योर्जागरूकयोरन्तः प्रवेष्टुं कश्शक्तः ?

एवं भूषणजालं चौर्यानीतं स्वधापरैर्वापि ।
गर्भे निगूह्य सैषा भजते कीर्तिं हि रत्नगर्भेति ॥ १३५ ॥

तदद्य शीघ्रं विचार्यन्तां तच्चेटीजनाः ॥

विष्वक्सेनः—

'अम्ब! तर्हि तामेव पृच्छामि व्याजान्तरेण' इति वसुन्धरासंनिधिं गत्वा नमस्कृत्य सविनयं 'अम्ब! श्वेतद्वीपमखिलमन्विष्टम्। कुत्रापि नोपलभामहे किरीटम्। यदि चौरैर्नीतं यत्र कुत्र वा भवत्या गर्भ एव निगूहितं तैस्तद्विज्ञातवत्या यत्राज्ञाप्यते तत्र पातालं शोधयामि' इति विज्ञापयामास ॥

भूमिः—

वत्स! किं प्रथमं लक्ष्मीसंनिधिं प्रविष्टवानसि। तथा भाति मे भवद्वचन-वैखरीश्रवणेन। परमव्योमसूर्यमण्डलयोः सतोरपि मयि किञ्चिदनुग्रहात् अस्मिन् द्वीपेऽपि वसति वासुदेवः। तदीर्षया इदमपि तेन त्याजनीयमिति बद्धकङ्कणया कमलया मयि चौर्यापवादानारोपयितुमित्थमाचरितम्। निक्षिप्तं वज्रमकुटं तया निजजनकेऽस्मिन्पारावारे। यतः —

चौर्याहृतं स्वपुत्र्या कुक्षौ धर्तुं किरीटमर्होऽयम्।
जनको ममैष भर्तुश्चरणो मकुटं तु धर्तुमुचितः ॥ १३६ ॥

इति क्षोणीवाणीमाकर्ण्य पारिषदाग्रणीर्बहिः निर्गत्य मन्त्रिभिस्सह लक्ष्मीधरण्यो-र्वचनचातुरीं तयोर्मात्सर्यवैखरीं च समालोच्य तदुक्तमुभयमपि परीक्षणीयमिति निश्चित्य निजपारिषदानाहूय निखिलमपि भूमण्डलं कृत्स्नमपि कलशजलनिधि-तलं च तैस्संशोधयित्वा कुत्राप्यलभ्यमानस्ततो गरुडमाहूय, 'भो! पतङ्गपुङ्गव! भवान्निरन्तरं भगवत्सेवापरतन्त्रः तत्सन्निधावेव जागर्ति। तत्र भवदविदितं न किञ्चिदप्यस्ति। केनापहृतं किरीटमिति पृष्ट्वा तेन भवानिवाहमपि दूरत एव सेवां कुर्वन् अधिवसामि। सति प्रकृते तदौपवाह्यतां भजामि। तादृशप्रकरणे न कदाचिन्नष्टं किरीटमावाभ्यामप्यन्त्यन्तसंनिकृष्टश्शयनीभूततया सर्वतो मुखदृष्टिर्द्विसहस्राक्षतया प्रष्टव्यः पन्नगपुङ्गव इत्युक्तः। पुनः 'किं तत्रास्ति तव विशय' इति पप्रच्छ ॥

गरुडः—

निजभोगलालसोऽयं विषमहितत्वाद्भयङ्करो नृणाम् ।
अपि च द्विजिह्वनाथः को जानीते तदीयदुश्चर्याम् ॥ १३७ ॥

वल्मीकशतमगम्यं तस्य स्थानं समीक्ष्यतां शीघ्रम् ।
कुद्दालकैः खनितैः खाते तस्मिन् स्फुटी भवेत्सर्वम् ॥ १३८ ॥

अपि चास्ति भोगवत्यां सन्देहो मे तदीयनगरी सा ।
पश्चात्परीक्षयामस्तामपि गत्वा विलोक्य सर्वत्र ॥ १३९ ॥

यो रत्नशोभि मूर्ध्ना तस्यास्त्याशास्तु रत्नभूषायाम् ।
किं रत्नशब्दवाच्यैः पाषाणैर्मे प्रयोजनं भवति ॥ १४० ॥

इतीमां चारुमतीं वाचमाकर्ण्य विष्वक्सेनस्तदुक्तरीत्या सर्वत्रान्वेषयित्वाप्यलभमानो मकुटं भुजङ्गपुङ्गवसंनिधिमासाद्येत्थमवादीत् ।

शय्याभूतो मुरारेस्त्वमसि ननु भवान् लौचनैरप्यनन्तै-
स्सर्वं पश्यन्निहास्ते रहसि कमलया भोगकालेऽपि क्षिप्तम् (?)[1]
व्यापारं वेत्सि कृत्स्नं न भवदविदितं किञ्चिदस्तीह तस्मा-
द्भूषा रत्नं किरीटं क्वनु कथय भवानेव तन्मार्गवक्ता ॥ १४१ ॥

शेषः— (सकोपं)

चण्डाद्या द्वारपालाः करविधृतगदाचक्रशङ्खास्त्वदीयाः
किञ्च प्राकारपाला अपि कुमुदमुखास्तावकास्त्वं च नित्यम् ।
द्वारे वासं विधत्से निखिलमपि भरं चोद्वहन् वेत्रपाणिः
त्वत्साहाय्यं विना को मकुटमपहरेत्तादृशः कोऽत्र धीरः ॥

विष्वक्सेनः—(सविनयं)

किमावयोरन्योन्यमनस्तापेन । कुत्र भवतस्संशयः कथनीयः ।

---

1. क्लृप्तम् (ख)

शेषः—

सततं हरिसंश्लेषं भजतो भाग्यं ममायमसहिष्णुः ।
आरोपयितुं[1] चौर्यं मयि मकुटीमचूचुरद्गरुडः ॥ १४३ ॥

अथवा

यदयं रत्नसहस्रं मूर्ध्नाभिरेवं दधानि तदसूयाम् ।
प्राप्तः पन्नगवैरी स्वयमपि हर्तुं जहार मणिमकुटम् ॥ १४४ ॥

अहमम्बुजाक्षनासावंशोद्भूताश्श्रुतीः श्रुते मधुराः ।
सति[2] पिबन्नेत्राञ्जलिभिस्तत्परतन्त्रो भवन्नजानेऽन्यत् ॥१४५॥

द्विजराजनाममात्रश्च त्रीणि विद्वेषमाचरन्नित्यम् ।
विमतैकपक्षपाती विश्वसनीयः कथं विशेषज्ञैः ॥ १४६ ॥

इतीमां फणीन्द्रवाणीमाकर्ण्यात्र भगवदनीकपः 'सर्वमिदं वचनजातं लक्ष्म्यादीनां परस्परमात्सर्यविजृम्भितं न किञ्चिदपि परमार्थम् । न चैतेषु भगवदन्तरङ्गेषु संशयावकाशश्च । ततो बाह्यजना एव विचारणीया' इति निश्चित्य 'पूर्वं प्रत्येकशो निरुद्धान् भक्तभागवतजनान् चामरग्राहिणीप्रभृतींश्च मदीयां सभां क्षणमात्रेण समानयत' इत्याज्ञाप्य भटान् स्वयं सभां प्रविश्य तत्र तावदानीतेषु भगवत्परिवारेषु निस्तरङ्गार्णवनिर्विशेषं सुस्तिमितेषु च मेघनादगम्भीरया गिरा निखिलभीकरान्निजकिङ्करानाहूय 'समानीयन्तां बहुसारावेत्रभाराः । सज्जीक्रियन्तां शृङ्खलानिवहाः । संगृह्यन्तां शाणोल्लीढानि शूलानि । संनद्धा भवन्तु मदवारणाः । एकत्र पुञ्जीक्रियन्तां व्याघ्रपञ्जराः । सम्पाद्यन्तां नासाभेदछुरिकाः । प्रमाणार्थं आह्रियन्तां तप्ततैलद्रोण्यः । सन्तप्यन्तामयःपिण्डनिचयाः । समानयत सर्पघटानीत्युद्घुष्य दशनसन्दष्टनिजाधरपल्लवो रोषभीषणविलोचनो बभूव ।

तदा सर्वेषु भक्तभागवतेषु किं विधूतपुण्यपापानामस्माकमपि प्राचीनानि कर्माणि विचार्य धर्मराजवच्छिक्षां करिष्यत्ययं विष्वक्सेनः । परमसाम्यश्रुति-

1. आरोपयसि त्वं ? (ख) 2. सुपिबन् (ख)

वचनविस्रब्धा वयमेतत्पदं सम्प्रार्थ्य समागताः। अत्रापि यमलोकवद्भवति व्यापारः। सुतरां स्वर्ग एव सुखदः। किं फलम्? विप्राः पश्चिमबुद्धयः। क्षीणपुण्यानां ततो निर्गमनमाशङ्क्य खलु पदमेतत् सुस्थिरमभ्यर्थितमस्माभिः। अत्रापि एवम्। निर्बन्धे किं कुर्म इति चिन्तयत्सु किमपराद्धमस्माभिः उपचार-कृत्येष्वित्यालोचयत्सु चेटीजनेषु, तद्भीषणमुखावलोकनमात्रेणैव कम्पमानाङ्गीषु शुष्यद्वदनासु, स्रंसद्दुकूलवलयासु चामरग्राहिणीषु, वित्रस्तेषु हस्तच्युतायुधेषु द्वारपालयूथेषु विलक्षणशेमुषीकास्सचिवाः तेषामिङ्गितानि ज्ञात्वा साञ्जलिबन्धं 'भो! सेनाधिप! न कदाचिदेषु भगवत्परिवारेषु संभवति चौर्यकृत्यम्। सर्वमिदमासुरीकृत्यमिति प्रतिभाति। शास्त्रतस्तन्निर्धारणकुशलशिक्षणधिषणं समाहूय पृच्छामस्तावदेते यथाक्रमं तत्तत्कैङ्कर्येषु भगवत्प्रबोधात् पूर्वं नियोजनीयाः। स्वामिना तत एवात्र निश्चिते चौर्ये तत्प्रकारं करिष्याम' इति विज्ञापयामासुः।

विज्ञापनं तदीयं सुतरामकर्ण्य सर्वे परिवारान्।
स विमुच्य निर्जराणां गुरुमानेतुं समीरयद्भृत्यान् ॥ १४७ ॥

ततस्ते भृत्याः झटिति स्वर्लोकमासाद्य तत्र सुरतटिनीतटमधिवसन्तं पौर्वाह्णिकीं क्रियामाचरन्तं बृन्दारकाचार्यमवलोक्य, 'आसीत् नियमनं सेनान्यः। अद्यागच्छ क्षीरसागरमि'त्यवोचत्। गुरुरेतद्वचनमाकर्ण्य सन्तोषो-त्फुल्लवदनो निरर्गलनिर्गलदानन्दबाष्पाविलनयनः समुद्बुद्धरोमाञ्चो, 'धन्योऽहम्। अद्य सुप्रभातारजनी। फलितो मम सुकृतकल्पतरुः' इति बाहुमुद्यम्य कूजन् नृत्यन् हर्षातिशयेनेतस्तत उन्मत्तवत् प्रधावन् आह्निकशेषं तन्त्रमात्रेण निर्वर्तयन्, सरित्तीर एव पूज्यं पूजोपकरणानि च विसृजन्, इन्द्रदर्शनावसर-मना पृच्छन् उक्तमपि अनाकर्णयन् पञ्चाङ्गकोशसहचरीं जपाक्षरमालिकां केवलं करकमलेनोद्वहन् अतित्वरया मुहुर्मुहुः स्खलच्चरणं विस्रंसदुत्तरीयं ससंभ्रमं कलशसागरं प्रत्यवरोहन् अनुगतान्परिचारकछात्रानगणयन् क्षणमात्रेण श्वेतद्वीपं आसाद्य द्वारपालैर्विष्वक्सेनसंनिधिमानीतस्तच्चरणकमलयोः प्रणम्य

साञ्जलिबन्धमवतस्थे। तदा सेनानीसचिवास्तमेकत्र पीठे समुपवेश्य फलपुष्प-ताम्बूलादिकं पुरतः पात्रे विन्यस्य, 'भो सुरसचिव! कश्चिदस्माकीनः प्रश्नः परिपालनीयः' इत्यवोचन्। तदाकर्ण्य प्रहृष्टवदनो गुरुः फलादिकं स्वेष्ट-देवतायै समर्प्य लक्ष्मीपतेरंघ्रियुगलं मनसा समाकलयन् तदनुज्ञया लग्नबल-मवलोक्य ग्रहावस्थादिकमङ्गुलीभिर्गणयन्, 'चोरप्रश्नोऽयम्। तदपहृतं वस्तु धवलमतिपृथुलम्। किञ्चित् पीतादिवर्णमिश्रं च। तदपहर्ता पुमानति-भीषणोऽसुरजातिः। तदेतल्लोक एव नास्ति। तथापि यतोऽहमुच्चस्थानगतो लग्नं एतत्पूर्णदृष्ट्यां प्रतीक्षे, ततोऽपहृतं वस्तु शीघ्रमेवैकद्विजमुखेन लप्स्यत' त्यवादीत्॥

सुरसचिववाचमेनां श्रुत्वा हृष्ट्वा विधाय करतालम्।
जहसुर्गजाननाद्याः किमितः परं संशयोऽत्रेति ॥ १५८ ॥

ततो विष्वक्सेनस्सकुतूहलं पुरद्वारपालनाहूय 'कदात्र प्रविष्टा असुराः? कदा बहिर्गताः? अथवा प्रच्छन्नरूपाः किमन्तः प्रविष्टा?' इति पृष्ट्वा 'स्वामिन्, प्रह्लादमन्तरात्र न कस्यापि असुरस्य प्रवेशोऽस्ति। किंतु मास-द्वयात्पूर्वं प्रह्लादतनयसच्छायः कश्चन भागवतः सुधृतोर्ध्वपुण्ड्रचक्रादि-लाञ्छनोऽन्तः प्रविष्टः। स त्वन्तरेवास्ति न निर्गतो बहिरि'ति तैरुक्ते स्वय-मुच्चैर्हसन् करतालिकामारचय्य 'स एव चोर' इति निश्चित्य, 'स इह कुत्रास्ति विज्ञाततदीयमुखच्छाया यूयमेवान्विष्य तं आनयत' इत्याज्ञाप्य तैः सर्वत्र अन्विष्टोऽप्यदृष्टे तस्मिन् दृष्टे, 'भोः स्वामिन्! सर्वत्रेदं द्वीपं गोष्पादमात्र-मप्यविहाय संशोधितम्। न कुत्रापि अस्ती'ति विज्ञापिते पुनरित्थं चिन्तया-मास—अहो, विरोचनस्यैवेदं दारुणं कृत्यम्। क्व विरोचनान्वेषः क्व वयं भगवत्सेवापराः। परमपुरुषस्य प्रबोधसमयश्च समुपनतः। प्रबोधात्पूर्वमेवानीतं चेदेतत्किरीटं तदा सफलं मदीयं जीवनं अन्यथा 'किमरे सेनाधिप! पुरद्वार-संरक्षणादिषु चतुरोऽसि' इति मन्दहासं भगवता प्रोक्ते तदानीं मृतप्राय एवाहं भविष्यामि हि। ततः किं कुर्मो वयमिति किञ्चिद्दूरं गच्छन् पुनरागच्छन्

पुनरासीनः पुनस्तिष्ठन्नेवमिति कर्तव्यतामूढश्चिन्तादन्तुरान्तरङ्गो बभूव। ततो गजाननाद्याः 'किं भो! केवलं चिन्तया वेगवत्प्रसेकं (प्रवेकं?) निराकृतासुरानीकं विहङ्गनायकं प्रोत्साहयसि चेत् प्रकृते भवन्मनोनुकूलं सिद्ध्यति' इति निवेदयाञ्चक्रुः। तदा विष्वक्सेनो झटिति समुत्थायान्तः प्रविश्य श्रीभूम्योः पन्नगपतगेश्वरयोश्च संनिधौ सर्वमिमं वृत्तान्तमावेद्य तर्हि कथं जेतव्यो विरोचनः कथं वा नेतव्यः किरीट इति श्रीभूमिभ्यां संपृष्टो विष्वक्सेन इत्थं विज्ञापयामास॥

अविरलसरलैः पृथुलैस्तरलैर्व्यालैरवाप्तपातालम्।
खगेश्वरादमुष्मादन्यः को वाधिगन्तुमधुनेष्टे ॥ १४९ ॥

किञ्च

भगवत्प्रबोधवेला समजनि ननु मातरौ ततः पूर्वम्।
जित्वा रिपून् किरीटं त्वरया हर्तुं खगाधिपात् कोऽन्यः॥

अपि च

या ब्रह्मजातिरत्नैर्जुष्टा हृष्यज्जगत्त्रयी मकुटी।
तामुद्धर्तुं मग्नां शक्तश्छन्दोमयाद् द्विजात् कोऽन्यः॥ १५१ ॥

इति॥

एवं देव्योः पुरतः प्रोत्साहितोऽपि पतगपतिरविदित्वा भगवदाशयं कथं मया गन्तव्यम्। भगवानेव 'प्रह्लादतनयोऽयम्' इति कृपया विरोचनाय किरीटं वितीर्णवान्यदि तदा कथम्' इति च चिन्ताकुलमानसो बभूव। तदा लक्ष्मीः 'वत्स! विहगेश्वर! न कार्योऽत्र विकल्पो। भवता प्रागेव इदानीं अङ्गपरिवर्तनसमये क्व किरीटमिति मया पृष्टः सर्वज्ञोऽपि भगवान् 'निद्रालुरहं किं जानामी'ति कथितवान् अतस्त्वर कार्ये इत्यभाणीत्।

श्रुत्वा वाणीं रमायास्सपदि विहगराट् कौतुकोद्धूतपक्षः
किञ्चिच्चञ्चूपुटाग्रं विमलमणिमयस्तम्भशातं वितन्वन्।
नत्वा देवं समस्तैरपि भव विजयी मङ्गलं तेऽस्त्वितीदृक्
वाग्भिस्संवीक्ष्यमाणस्सगरुदिव महाभूभृदेष प्रतस्थे॥ १५२ ॥

तदानीं खलु,

पक्षप्रोद्यन्नभस्वद्वितताविचलितोद्वेलसप्ताब्धिगर्भ-
प्रेङ्खद्वीची सहस्रारवपटुपटहाध्वानविभ्यद्विशोभा ।
वेगप्रोत्क्षिप्तभूमीधरवरनिकरालोकमात्रोद्गृहीत-
स्फूर्जद्दम्भोलिकेन्द्रा समजनि विहगाधीशितुर्जैत्रयात्रा ॥१५३॥

सिन्धोः किं मन्थनार्थं पुनरपि विबुधैर्नीयते मन्दराद्रिः
किं पक्षौ नास्य लूनौ सुरपतिरमृतप्राप्तये किं व्यमुञ्चत् ।
शीघ्रं लब्धुं सुधां किं भुजगमपि पृथुं वासुकीं पूर्वमेव
क्षोणीभृत्यत्र बद्ध्वा नयति सुरततिश्चेति नृणामभूद्धीः ॥१५४॥

ऊर्ध्वानीताब्धिपूरा अधरितदिविषात्सिन्धुगम्भीरनीराः
प्रोद्धूतांभोदधारा भुवि दिवि पतितोन्नीतदीप्ताभतारा ।
रेणुप्रायाद्रिभारा असुरवरमहा भीतिदानात्युदारा
घोरास्फारप्रचारा झटिति समभवन्तार्क्ष्यपक्षात्समीरा ॥१५५॥

एवं शीघ्रं गच्छन् तुङ्ग[1]विक्रमः पतत्रिपुङ्गवो दिवि भुवि च समन्विष्य ततः प्रविष्य पातालं तत्र महतीं असुरचमूं सज्जीकृत्य अनिरुद्धमकुटहेतोर्युद्धाय बद्धश्रद्धं संनद्धं विरोचनमद्राक्षीत् । सोऽयमेनं समागतमालोक्य प्रहसन् स्वसचिवानाहूय "किमहो वासुदेवस्स्वयमनागच्छन् स्ववाहनं प्रेषितवान् । वयमपि अस्मदीयं वाहनमनेन योद्धुं प्रेषयामः । किं महत्यास्सेनायाः वृथा संनाहेन ।"

मन्त्रिणः—

विकिरीटस्सोऽयं वस्त्रावकुण्ठितशिरस्कोऽस्माकं पुरतो निर्लज्जो कथमागच्छेत् । अथवा अनेकपत्नीसुरतक्रीडानीतरात्रिः परिश्रान्तोऽद्यापि स

1. तुरग (ख)

निद्राणो भवति । तत्परिजनाः किरीटमदृष्ट्वा स्वेषु चौर्यापवादसंभवभिया वेगशालिनमिमं पक्षिणं सर्वत्रान्वेष्टुं प्रेषितवन्तः ॥

विरोचनः –

किं यूयं तस्य वस्त्रावकुण्ठितशिरस्कतां ब्रुवध्वे । अपि नास्ति किरीटान्तरम् ॥

मन्त्रिणः—

सर्वानपि आत्मानमिव पश्यन्ति भवन्तः । किं सर्वेऽपि स्वामिन इवानेकमणिकिरीटा भवन्ति ।

विरोचनः—

भवतु । किमयं पुरा वानर इव सीतावृत्तान्तं अधुना किरीटोदन्तं ज्ञातुमागतः । उत किरीटमेव अहर्तुम् ।

मन्त्रिणः—

दृष्टेऽस्य संभ्रमे तदाहर्तुमेवोद्युक्त इवाभाति ।

विरोचनः—

तर्हि असौ कथं जेतव्यः ?

मन्त्रिणः—

किमसाध्यं श्रीमद्योधानाम् । क्षणमात्रेणामुं रज्जुभिर्बध्वा पञ्जरमानयन्ति ।

विरोचनः—

कुत्रास्ति एतदनुरूपो महान् पञ्जरः ?

मन्त्रिणः—

मयः क्षणाद्रचयति यः पञ्जरमकुटपेटिकामिव ।

इत्यालोच्य ततस्तेन चोदिता योधपुङ्गवाः ।
पाशैर्बद्धुं गरुत्मन्तं प्रायो यत्नमचीकरन् ॥ १५६ ॥

विज्ञाय यत्नमेषां प्रज्ञावार्धिः पतङ्गकुलधुर्यः ।
पक्षैर्निहत्य योधान् पाशांश्चञ्चूपुटेन जग्राह ॥ १५७ ॥

तत्रौघ[1]पुटलग्नं रज्जुगुणं तं विलोक्य भुजगेन्द्रः ।
त्रस्तादुरगभ्रान्त्या दुःखं प्रष्टुं समुद्यता बन्धून् ॥ १५८ ॥

विहगाधिपस्य चेष्टां दृष्ट्वा रुष्टो विरोचनो वीरः ।
बलिबाणमयपुरोगैस्सार्धं योद्धुं विनिर्ययौ सपदि ॥ १५९ ॥

दृप्यत्कुम्भीन्द्रसान्द्रा पटुचटुलनदद्घोटकोटिप्रसादा
प्रोत्तुङ्गस्वर्णशृङ्गध्वजविविधपरीसङ्ग भास्वच्छताङ्गा ।
नानाशस्त्रास्त्रकूटोद्भटभटपटलीक्ष्वेलितारावपूर्णा
तावत्सेनासुराणां खगपतिमभितस्संनिरुद्धावतस्थे ॥ १६० ॥

बाणः क्षोणीधरेन्द्रप्रतिमतनुरसौ नैजबाहासहस्रै-
र्दीप्यन्नानास्त्रपूगो विहगकुलपतिं हन्त हन्तुं प्रवृत्तः ।
तं दृष्ट्वैव प्ररोषाज्झटिति चटचटत्रोटिकोटिप्रघातै-
र्बाणं तत्ताततातावपि सपदि हठाज्जर्झराङ्गान्व्यतानीत् ॥

तदानीं किल

पक्षीन्द्रपक्षाहतिभिः क्षतजोक्षितेषु
सेनागणेषु बहुशो भयविद्रुतेषु ।
बाणस्तु शोणितझरीं स्वतनोस्स्रवन्तीं
रुन्धन् करैस्स रणसीम्नि बभूव खिन्नः ॥ १६२ ॥

दीनं सुतं निजमवेक्ष्य बलिस्तदानीं
धिक्कर्म तात कृतमेतदिहेप्सितं किम् ।
तद्भूषणं वितर शीघ्रमसौ पिशाचो
गच्छेद्बहिः किमु वयं न किरीटवन्तः ॥ १६३ ॥

---

1. तत्रोटी (ख)

तस्येमामतिकठिनां श्रुत्वा गिरं विरोचनस्तूर्णम् ।
लज्जाविनम्रवक्त्रो विमृशन् गात्रं क्षताञ्चितं तस्थौ ॥ १६४ ॥

तावन्महामायावी मयासुरस्समागत्य, 'मया विरचितमिदं मायाकिरीटं पश्यत । इदमस्मै प्रदाय सान्त्ववादेन बहिर्निर्गमयिष्यामो' इत्यवादीत् । तदिदं मयवचनमाकर्ण्य युक्तियुक्तं मन्वाना विरोचनप्रभृतयो पक्षिराजमालोक्य, 'किं भो ! भवद्भ्रातृवंश्येषु अस्मासु भवत ईदृश कोपावकाशनिमित्तम् । सुप्तस्य भवत्स्वामिनः किरीटेन किमिदानीं प्रयोजनम् ? पातालमानीय वितेजस्क-निबिडान्धकारे तत्र कथं प्रकाशेत' इति परीक्ष्य पुनर्भगवतः प्रबोधात्प्रागेव आनेष्यामीति निश्चित्यैव विनोदादानीतमिदं किरीटमहमेवानेष्यामि क्षीरसागरम् । अथवा भवानेव नयत्विति कथयंस्तत्पुरतो मयकृतकिरीटं निवेशयामासुः ।

आलोक्य पक्षिनेता मकुटीं साम्येन सोऽपि सन्देही ।
अप्राक्षीत्कुशलमिमान्निर्जीवासून् किञ्चिदप्यूचे ॥ १६५ ॥

मयः तदाकर्ण्य धिक्कौशलं मदीयं यतः सर्वथा तत्साम्यमापाद्यापि अस्मिन्मकुटे कञ्चनासुरजीवं नावेशितवानस्मि । तदहमेवात्राविश्य प्रतिब्रवीमीति तदन्तःप्रविश्य 'किं भो पक्षीश्वर ! भवतः कुशलम् । भवत्सन्दर्शनानन्द-पारवश्यगद्गदागलितगलोऽहं एतावन्तं कालं निरुत्तरोऽभवम् । एवमसुरपरतन्त्रः कथञ्चिज्जीवामी'त्यकथयत् । तथापि अस्य वितेजस्कतामप्रौढोक्तिं च निशम्य च विहङ्गपुङ्गवोऽत्यन्तसंशयाविष्टहृदयः पुनरपि, 'भो मकुटेन्द्र ! कतिपयदिवसेभ्यः पूर्वं सर्वंसहयापि कंसाद्यसुरभारमसहमानया धरण्या सह पितामहः समागत्य क्षीरसागरं स्वामिसन्निधौ किं व्यजिज्ञपत् ? स्वामिना किमाज्ञापितं ब्रूहि' इति पृष्ट्वा पुनरपि निरुत्तरे तस्मिन् त्रोटपुटेन दृढकुट्टनमारचय्य तस्मिन् किरीटे ततः पलायिते मये महामर्षभीषणो विरोचनप्रभृतीन् हन्तुमभ्यद्रवत् ॥

कांदिशीकेषु चैतेषु तां दिशं पक्षिपुङ्गवः ।
अनुद्धृत्य पुनस्तस्य कोशागारमवाप सः ॥ १६६ ॥

निर्भिद्य पेटिकास्सर्वास्त्रोटीपुटविघट्टनैः ।
दृष्ट्वा किरीटमनघं हृष्टोऽभूद्विनतासुतः ॥ १६७ ॥

तत्तेजोभिरिहाद्भुतैः कमलिनीकान्तायुतप्रोज्वलैः
पाताले निबिडीकृते दितिसुतास्सान्वेषणार्थद्विषा ।
पक्षीन्द्रेण विनिर्मितां पृथुतमां दीप्रां प्रदीपावलिम्
मत्त्वातीव भयातुरा गिरिदरीरंध्रे निलिल्युस्तदा ॥ १६८ ॥

आदाय वैनतेयो मकुटं बलिसद्मनो विनिर्गत्य ।
गच्छन्नभस्सरण्यां खं चुम्बन्तं ददर्श गोमन्तम् ॥ १६९ ॥

तत्र काचिदशरीरिणी वाणी समुत्थिता ।

उत्सृज्य नागभोगं क्षीरार्णवतोऽहमागतो मधुराम् ।
अद्यास्ति पर्वतेऽस्मिन्वीरोऽसि खग प्रयच्छ मकुटं मे ॥ १७० ॥

इत्येतां नभोवाणीमाकर्ण्य नभश्चाराग्रगण्योऽयं विस्मितमानसस्तस्मिन् गिरिवरे तत्र तत्र विचरन् भगवन्तं कचनमहीरुहपरिसरे,

राकाशशाङ्करमणीयमुखारविन्दौ
राजीवसुन्दरविशालतमाक्षियुग्मौ ।
मन्दस्मिताकलितबिम्बनिभाधरोष्ठौ
कन्दर्पकोटिविलसत्सुषुमाभिरामौ ॥ १७१ ॥

कालाम्बुदस्फटिकशैलनिभाङ्गलग्न-
नीलाभपीतवसनौ निगमान्तमृग्यौ ।
दिव्यौषधीं मृगयितुं धरणीधरेन्द्रं
प्राप्ताविवाद्भुततमौ सुरलोकवेद्यौ ॥ १७२ ॥

मूर्ताविव प्रथमतुर्यरसौ गभीर
वाणीविनिर्जितनवामृतधोरणीकौ ।
बाहालताविजितपन्नगराजभोगौ
बालौ ददर्शवसुदेवसुतौ तदानीम् ॥ १७३ ॥

तदा किल निरवधिकप्रमोदमेदुरान्तःकरणः पक्षिरमणः त्वरया समवतीर्य नभोमार्गान्निरर्गलदानन्दबाष्पः प्रबुद्धरोमाञ्चककञ्चुकितकलेबरः प्रणिपत्य तच्चरणराजीवयोस्स्वकरस्थितं वज्रमकुटं भगवतो वासुदेवस्य मूर्ध्नि समर्पयामास ।

कृष्णोत्तमाङ्गानुगुणप्रमाणः
किरीट आसीत्सुमहत्तरोऽपि ।
किमेतदालोक्य हली स्वपत्नीं
स्पर्धावशादन्यतनुं चकार ॥ १७४ ॥

स वामनोऽप्येष पुरा महत्त्ववान्
चकार वैरोचनगर्वमोचनम् ।
अयं महानप्यणुतां समाश्रितो
विरोचनस्यैव जघान गर्विताम् ॥ १७५ ॥

औन्नत्यं प्राप्य जनस्सुतरां लोके प्रकाशते युक्तम् ।
संकुचितोऽपि किरीटः कथमधुनाभून्महाप्रकाशढ्यः ॥१७६॥

महतो लघुसम्पर्के लाघवमेव क्षणाद्भवेल्लोके ।
सुमहानपि स किरीटो गोपसुतासो बभूव संकुचितः ॥१७७॥

बिभ्रत्किरीटमतुलं बिभाजेऽसौ स देवकीसूनुः ।
उदयाद्रिरिव तमालैर्नीलो मूर्ध्ना समुद्वहन् भानुम् ॥ १७८ ॥

अथ गरुडस्साञ्जलिबन्धं, किं भो भगवानपारं कलशार्णवक्षीरपूरं समाश्रितोऽपि तत्रागतां गोरूपां धरणिमवलोक्य गव्यक्षीरपानाभिलाषेणैव[1] देवकीस्तन्यामृतमप्युपेक्ष्य गोकुलमेवाधिगतः । पुनस्तत्रापि अतिपरिचयादुपेक्षयेव कलिन्दनन्दिनीक्षीरपूरमास्वादितुं बृन्दावनमासाद्य तद्विरोधिनं मद्रिपुं कालीयं ततस्समुत्सार्य ततोऽपि मधुरामोघसुधामाकलयितुं कुतूहली तत्र समागत्य तदाश्रितं सुधाशनविरोधिनं कंसं निहत्य निष्कण्टकं निवसन् भवान् किमद्य

1. गव्य..... णेव (ख)

बहुकण्टकावृते प्रवर्षणाख्य शिखरेऽस्मिन् निरंतरघनक्षीराभिषिक्तो निवसत्यग्रजेन साकमित्यप्राक्षीत् ।

कृष्णः—

कंसोज्झितापि मधुरा तस्य श्वशुरेण शश्वदभिरुद्धा ।
भवति ततस्तां त्यक्त्वा निवसावोऽत्र प्रवर्षणे दुर्गे ॥ १७९ ॥

गरुडः—

यद्याज्ञातमिदानीं कृत्वा जामातुरनुचरं शीघ्रम् ।
आरोप्याधिस्कन्धं नेष्यामि त्वां बलेन सह मधुराम् ॥१८०॥

इत्येतां गारुत्मतीं भारतीमाकर्ण्य भगवान्वासुदेवः प्रहसन् 'तादृश एव भवान् । अन्यथा विरोचनापहृतं वज्रमकुटं कथं आनीतवानसि । मुहुर्मुहुर्जरासन्धसम्पादितानीकप्रशमनेन भूभारमवरोपयन्नहमेवं भवामि । तदनन्तरं मन्मुखप्रचोदितेन वातपोतेनैकेन तमुत्पाटयामि । गच्छ त्वं क्षीरसागरं' इति आज्ञापयामास ।

अथ लब्धानुज्ञः पतङ्गपुङ्गवः तच्चरणयुगलमभिवन्द्य प्रदक्षिणीकृत्य गगनमुत्पतन् क्षणमात्रेण श्वेतद्वीपसमीपमासाद्य दूरत एव किमस्य मुखसमुल्लासे दृष्टे लब्धकिरीट इवाभाति । रिक्तहस्तत्वदर्शनेन न तल्लाभस्सूच्यते । तर्हि किरीटापहारिणं निश्चित्य तत्सकाशात्तदाहर्तुमक्षमस्तदिहावेदयितुं आगच्छति । तथा सति कुमुदादिसैनिकैस्सह विष्वक्सेनेनैव गन्तव्यमित्यादिनानाविधचिन्तनशालिभिर्निर्गत्य सूरिभिस्समुद्वीक्ष्यमाणो गगनतलादवतीर्य श्रीभूम्योश्चरणकमलोपान्ते प्रणिपत्य स्वानुष्ठितं सर्वं विष्वक्सेनादीनां पुरतो व्यजिज्ञपत् ॥

श्रुत्वा विचित्रमेतद्वृत्तान्तं ते सुविस्मयाविष्टाः ।
बहुशो विहङ्गराजश्लाघामसकृद्वितेनुरतिहृष्टाः ॥ १८१ ॥
इह कृष्णस्सहलिना गत्वा मधुरां जरासुतं जित्वा ।
वसुदेवदेवकीभ्यां प्रीत्याश्लिष्टो बभूव परितुष्टः ॥ १८२ ॥

'वत्स, वल्लवीप्राणवल्लभ कुत्रलब्धमिदं येन निरपेक्षितचन्द्रसूर्यालोकं तनोषि इमं लोकम्। किंनु त्वदग्रजोऽप्ययं विचित्ररत्नकिरीटं बिभर्ति। किमेतौ किरीटौ करवीरपुरनिहतात् सृगालवासुदेवादत्र पराजिताज्जरासन्धाच्च संगृहीतौ। यद्वा ताभ्यां सह युद्धप्रकरणे दिव्यायुधैस्सह देवताभिरेव समर्पिताविति'। तदाकर्ण्य भगवानित्थं अवोचत् —

"सृगालवासुदेवस्य किरीटं तत्सुतेऽर्पितम्।
क्षीराब्धिवासुदेवस्य किरीटं तन्मया धृतम् ॥ १८३ ॥
अग्रजोऽयं निर्जरस्त्रीवितीर्णं मकुटोज्वलः।
किं जरासन्धमकुटं संस्पृशेच्चरणेन वा" ॥ १८४ ॥

पुनः पुनरिमं वृत्तान्तं वासुदेवबलभद्राभ्यां सविस्तरं समाकर्ण्य वसुदेवोग्रसेनाक्रूरप्रभृतयो देवकीरोहिण्यादयश्च विस्मयाक्रान्तहृदया बभूवुः ॥

अथ कृष्णो निजमकुटं प्रददौ रामप्रियाय देवाय।
यदुशेखराभिलषितः प्राप्तो मधुरां य एव साकेतात् ॥ १८५ ॥

अनिरुद्धमकुटमेतद्धार्यं वाराशिमध्यगेनैव।
इति किं समुद्रदुर्गां द्वारवतीमप्यसावगाद्देवः ॥ १८६ ॥

निजमूलस्य विभोस्तद्दर्शयितुं किं किरीटमतुलाभम्।
रामप्रियाद्रिमेतं सम्प्राप्यासौ विराजते सततम् ॥ १८७ ॥

इति वज्रमकुटमहिमा कथितो संक्षिप्ततो मया देवाः।
यस्संश्रुतो जनानां वितरति नितरामभीप्सितान्यनिशम् ॥

स्वस्ति प्रजाभ्य एनां न्याय्येन पथा महीं नृपाः पान्तु।
शुभमस्तु गोद्विजेभ्यो लोकास्सुखिनो भवन्तु सर्वेऽपि ॥ १८९

एवं वीणामुनिमुखकमलगलितं मकुटमहिममकरन्दमापीय पाकशासन-प्रभृतिषु प्रमोदार्णवनिमग्नेषु कदा द्रक्ष्यामस्तां मकुटीमिति चिन्तयत्सु, भगवान्

सम्पत्कुमारो विविधभक्तजनाकलितमण्डपसेवामङ्गीकृत्य रामानुजगुरुमन्दिरं प्रविश्य विविधानौपचारिकसांस्पर्शिकभोगान् स्वीकृत्य आभ्यवहारिकभोग-स्वीकरणकुतूहली बभूव ॥

तावत्तस्य पुरस्ताद्दिव्यं भव्याभं तु प्रियं हव्यम् ।
भक्ष्यैरनेकलक्षैस्सहितं सद्यस्समर्पितं हृद्यम् ॥ १९० ॥

ततो भगवदङ्गीकृतं हविरादिकमङ्गीकुर्वत्सु भागवतेषु इन्द्रस्समन्तादव-लोक्य, अहो, विशेषतः बिम्बान्न[1]ग्रहण एव कुतूहलेन इमे भागवताः । अत एव बहुशोऽत्र बिम्बान्नराशय एव पर्वतोपमास्सन्दृश्यन्ते ।

नारदः—

यत इदं चिरसम्भृतमप्ययातयामं भवति । किं तु विलम्बाधिक्ये रसाधिक्यमेव सम्भवति ।

इन्द्रः—

(आघ्राणमभिनीय) अहो, वासनामात्रग्रहणमपि सरसयति मदीयाम् जिह्वाम् ।

नारदः—

तिलजीरिकादिपूर्णै श्रीपर्णानां दलैश्च संमिश्रम् ।
समरीचिसर्षपाद्यद्रामठसारैश्च वासितं बहुशः ॥ १९१ ॥

किञ्चिल्लवणोपेतं लिकुटरसार्द्रं सतैलघृतसिक्तम् ।
बिम्बान्नमेतदतुलं कं चापल्येन योजयेन्न जनम् ॥ १९२ ॥

इन्द्रः—

तर्हि कथं लक्ष्यमेतदस्माभिः ?

अक्षरलवणतैलं हविरस्मभ्यं ददाति हवनेऽत्र ।
बलिदानेऽपि यतोऽस्मान् पायसहविषैव तर्पयन्त्यनिशम् ॥

---

1. चिञ्चान्न (ख)

नारदः—

भूदेवरूपमङ्गीकृत्य भागवतगोष्ठीं प्रविष्टो यदि निरवधिकं बिम्बान्नं ददाति जिह्वाचापल्यवते भवते ।

इन्द्रः—

तथाप्यज्ञातद्रामिडप्रबन्धं मां गोष्ठीं प्रवेशयन्ति वा न वा अमी भागवताग्रेसराः ।

नारदः—

किं नाधीतोऽयं दिव्यप्रबन्धो भवता । तर्हि बद्धगोष्ठीप्रवेश्योऽसि । न ते मुमुक्षुगोष्ठ्यामवकाशस्सिद्ध्यति । यतः,

स प्रबन्धस्य मोक्षेच्छा जायते जगतीतले ।
अप्रबन्धस्य ते शक्र मुमुक्षुत्वं कथं भवेत् ॥ १९४ ॥

इन्द्रः—

अप्रबन्धोऽपि बद्धोऽहं कथं स्यामधिको न किम् ।
लसन्मुक्तावलीमध्यनायकोऽहं मुमुक्षुतः ॥ १९५ ॥

नारदः—

किमनेन श्लिष्टवागाडम्बरेण ?

बिम्बातरुस्थयोगिप्रवरमुखोत्थं न वेद यो वेदम् ।
बिम्बान्नमेतदनघं किं चास्तमं हि लभ्यते तेन ॥ १९६ ॥

इन्द्रः—

सत्यमेतेऽध्यापका मुहुर्मुहुर्भगवत्प्रसादसंलब्धबिम्बान्नरसास्वादहेतोः किल वकुलाभरणप्रणीतद्रमिडाम्नायसुधाधोरणीमनवरतं अतृप्ताः पिबन्ति । अन्यथा कथं केवलं मधुररसं क्षणतृप्तिजनकं सदा पातुं समर्था भवन्ति । अस्माकमपि एतल्लब्धं चेत् स्वर्गगतावशेषं पीयूषं निरवशेषं भवेत् निमिष-मात्रेण ।

(पुनस्सर्वत्रावलोक्य),

अहो महत्तरः समुज्जृंभितोऽत्र बिम्बान्नसंग्रहकोलाहलः। यदत्र बहवो बाहुमुद्यम्य 'वयं बदरिकाश्रमवासिनो, वयं श्रीरङ्गादागताः, वयं तुण्डीरमण्डलस्थाः, वयं पण्डिताः, वयं वेदान्तिनः, वयं कुटुम्बिनः, वयं दरिद्राः, वयमतिक्षुधिताः, किञ्चिद्वास्माकं भगवन्निवेदितं दातव्यमि'ति मुखरयन्ति भगवन्मन्दिरम्। 'अन्ये केचिदेवमाप्रभातम् अस्माभिः प्रार्थितमपि न लभ्यते किञ्चिदपि ततो बाहुबलेन लभ्यमि'ति निश्चित्य निजोत्तरीया[1]ण्युद्धृत्य कटिवेल्लितानि तदुपरि निजोत्तरासङ्गं दृढतरं संवेष्ट्य स्कन्धोपरि लम्बितानि नीलकुण्डलानि कर्णोपरि संलग्नानि विरचय्य शिरोवेष्टनप्रतिष्ठावस्त्रपुस्तकादिकमाप्तजनाधीनमाकलय्य सुदृढं शिखां बद्ध्वा 'रामानुज रामानुजे'ति सकरतालमन्नराशिसमीपमासाद्य स्वयमेव यथेच्छं हविस्सङ्गृह्णन्तो वेत्रपाणिजनाजिनकशाघातसहस्रमप्यगणयन्तो बहिर्निर्गच्छन्ति।

अन्ये केचिदशक्तास्तु,

आहारलेशार्थमिहागतास्ते प्रहारमासाद्य मुहुः प्रकामम्।
बिम्बोदनायास्तु नमोऽसुभिर्मां मुञ्चाधुनेत्यार्तरवं भजन्ते ॥१९७॥

इतरे कतिचित्

प्रदर्शयन्तो निजदन्तपंक्तिं प्रसार्य हस्तद्वयमूर्ध्वमेते।
आगन्तुकाः किञ्चिदिहार्थयन्ते मुहुर्निरुद्धागलहस्तिकाभिः ॥१९८॥

नारदः—

अन्यादृशी भगवन्निवेदितमहत्ता। तत्कथमनायासेन लभ्यते।

इन्द्रः—

कोऽयं बहिरपि महान् कलकलः श्रूयते?

---

1. निजान्तरीयाणि (ख)

नारदः—

राजाधीनं मकुटं द्विजराजोऽयं वहन्निजाधीनम् ।
बहिरद्य राजवीथ्यां बहुभिस्सैन्यव्रजैस्सहायाति ॥ १९९ ॥

इन्द्रः—

कस्य राज्ञो धनमिदं मकुटम् ?

नारदः—

यदुभूधरेन्द्रवंश्यो यदुभूभृत्पतिपदाब्जसंसक्तः ।
श्रीकृष्णनामधेयः कर्णाटमहीधराधिपो जयति ॥ २०० ॥
तदधीनं मकुटमिदं बहुधा परिपाल्यते हितेनेव ।
यत्कूटस्थः कृष्णस्तत्प्रायच्छद्रमाप्रियायास्मै ॥ २०१ ॥

इन्द्रः—

(सर्वैस्सह बहिर्निर्गत्य दूरतोऽवलोक्य),

यदुभूभृद्रमणं यो मकुटिना भूषयत्सपक्षीन्द्रः ।
यदुभूभृद्रमणमिमं मकुटाकलितं विधातुमायाति ॥ २०२ ॥

नारदः—

नानावर्णाभिरामा दनुतनयहृताप्युद्धृताह्यण्डजेन
प्राग्दत्ता ब्रह्मणासौ मणिमयमकुटी कोटिसूर्यादृतश्री ।
तत्तादृक्षार्थदात्री श्रुतिमकुटसमा किं भवेन्नैव वेति
प्रष्टुं किं पक्षिराजः श्रुतिमकुटगुरुं तद्गृहं संप्रविष्टः ॥ २०३ ॥

अथवा,

वेदान्तसूरिरचितं दण्डकरत्नं कुतूहलाच्छ्रोतुम् ।
वेदात्मा विहगेशो मन्दिरमेतस्य संप्रविष्टः किम् ॥ २०४ ॥

इन्द्रः—

कस्तत्र कार्यविशेषम् ?

नारदः—

तत्र मकुटस्य किञ्चिदातिथ्यं भवति। ततःपरं इहैव आनयति। ततो मन्दिरान्तः समागते मकुठकरे पक्षीश्वरे अभिषिक्ते च पञ्चामृतैः कोटिसूर्य-प्रतिभटे वज्रमकुटे संनद्धेष्वनिरुद्धकिरीटदर्शनबद्धश्रद्धेषु समस्तपरिवारेषु,

धृत्वा दिव्यं किरीटं यदुधरणिधराधीश्वरः पिङ्गलाङ्गं
संरुह्यैनं विहङ्गं मरतकशुकभृत्प्रोल्लसत्पक्षिशृङ्गम्।
दीप्तैः[1] कर्पूरदीपैर्मिहिरकरनिभैस्साधु नीराजितोऽयं
सर्वैस्संस्तूयमानो जयनिनदैस्सद्य एव प्रतस्थे ॥ २०५ ॥

निबिडैर्निजभक्तानां निवहैर्नितरां निरंतराद्गेहात्।
निर्गत्य नीरजाक्षः प्रविवेशोदग्रमण्डपं पौष्पम् ॥ २०६ ॥

सुमनो विमानमेनं सुमनस्सङ्घैस्समाश्रितं बहुभिः।
न बभूवुर्वोढुमिमे शक्ता भक्ता सदा तदुद्युक्ताः ॥ २०७ ॥

इन्द्रः—

किमिमे बहवोऽपि मानवास्सङ्घीभूय केवलं कुसुममयमपि समुद्धर्तुं इदं वाहनं असमर्था भवन्ति।

नारदः—

वयं सर्वेऽप्यस्मादवरूढाश्चेद्वोढुं समर्था भवेयुः।

इन्द्रः—(साङ्गीकारं)

लाघवोऽपि याति गुरुतां यदुशैलाधीशपादसम्पर्कात्।
एतादृशं गुरुत्वं सुमनस्सङ्घे कदा त्वया दृष्टम् ॥ २०८ ॥

ततस्समन्ताद्गिरिमवलोक्य,

भास्वद्दीप्तप्रदीपावलिनियुतयुतश्शौरिकैरीटरत्न-
ज्वालाजाज्वल्यमानस्तुलयति शिखरी मागधेन्द्रेण पूर्वम्।
प्रक्षिप्तावत्युज्वलार्चिर्ज्वलदुरुतरुभिस्सर्वतो दीप्तिमन्तम्
गोमन्तं सानुमन्तं समकुटवसुदेवात्मजाक्रान्तिकान्तम् ॥

---

1. दीप्रैः (ख)

नारदः—

इह पश्य बाणवैचित्री,

प्रक्षीणपुण्यराशिर्नक्षत्राणाङ्गणोऽत्र पतितः प्राक् ।
हरिसेवनात्तपुण्यो बाणव्याजात्पुनर्नभो भजति ॥ २१० ॥

अथवा

स्वर्गाश्रितो भवांश्चेदशनिप्रकरो भुवं व्रजेत्तस्मात् ।
भुवमाश्रितोऽसि यत्त्वं बाणव्याजात्समौर्ध्वमभियाति ॥२११॥

इन्द्रः—(शचींमवलोक्य)

पश्येमं परस्पर भ्रमचमत्कारम् । इह दिवि नृत्यन्तो रम्भादिसुरसुन्दर्यो भुवि नृत्यन्तीर्वाराङ्गनास्समवलोक्य तास्वधित्यका वीथिमणिकुट्टिमसंलग्ननिज-प्रतिबिम्बधिया किमङ्कुरिताद्य भूसम्बन्धादस्माकमपि मानुषीवत्सनिमेषतेति हस्ताम्बुजेन मुहुर्मुहुर्नेत्राम्बुजं संस्पृशन्ती मानुष्या वरवर्जिन्योऽपि तास्समा-लोक्य तासु पुष्पमण्टपमभितो निबद्धमहामुकुरबिम्बसंसक्तस्वप्रतिबिम्बभ्रमेण किमयं भगवान् विचित्रशक्तिं दुर्लभनिजकिरीटसन्दर्शनाय निर्निमेषतामस्माकं वितीर्णवानिति हर्षेण पुनः पुनर्नयनेन्दीवराणि संस्पृशन्ति ।

शची—

भरतकलाभिज्ञेन भवतैवायं भ्रमो जायते। मया तु तासां नेत्रस्पर्शोऽपि कश्चनाभिनयविशेष इति ज्ञातः ।

नारदः—इतः पश्य।

मन्दारकुसुमवृष्टिं वृन्दारकवृन्दकल्पितां मनुजाः ।
जानन्ति वज्रमकुटीभासामासां प्ररोहनिकुरुम्बम् ॥ २१२ ॥

किञ्च,

देवेऽस्मिन् चलदभ्रमेण निनदं स्वर्दुन्दुभीनामिमे
तस्यैवोच्चगम्भीरनिःस्वनमहो जानन्त आनन्दतः ।
उद्धृत्यास्य पुरःशिखी द्विजवराः पिच्छं सुवर्णोज्ज्वलं
वाणीमाकलयन्ति तत्सुवचसामकर्णनं कुर्विह ॥ २१३ ॥

इन्द्रः—

अहो प्रकृतश्लेषचमत्कारः ! यतो मयूरवाणी समाकर्णनं मयूरपिच्छव्यजनधारिणां पुरश्शिखब्राह्मणानां सामवेदपठनाकर्णनमपि श्लेषेण कथितवानसि ।

नारदः—

गान्धर्वगीतिमेनां गरुडगरुदग्रवासि शुकवाणीम् ।
ज्ञात्वातिविस्मयाढ्याः पश्यन्ति नरा मुहुश्शुकावेव ॥२१४॥

ततःपरं पुष्पमण्टपाद्विनिर्गत्य विविधमणिगणखचितकुट्टिमभूभागप्रतिबिम्बिताप्सरस्त्रीनिकरतया पूर्वं विहगाधिपेन पातालादुन्नीतमस्माभिः ईषद्दृष्टं सर्वोत्कृष्टं पुटकिनीविट[1]प्रतिभटं वज्रमकुटमिदानीं भुवि यादवाद्रीश्वरो बिभर्तीति श्रुतम् । तद्द्रक्ष्याम इति कुतूहलेन रसातलात् समुद्गच्छन्तीनां नागकन्यकानां निवहनिबिडाधोभागताभ्रमं जनयन्तीषु पुरो नृत्यद्वाराङ्गनावदनचन्दिरसहस्रलोकपरिहृष्यत्कुट्टिमचन्द्रकान्तसमुज्जृंभमाणविमलोदकधारापरिपूरिततया चिरविरहितवज्रमकुटालोकनार्थमाविर्भवत्कलशार्णवाकलितत्वभ्रमं कलयन्तीषु निरतिशयरामप्रियौदार्यविलोकनाद्विबुधोपेक्षाविरतस्वसाफल्यं प्रार्थयितुमागत्य भुवि प्रणिपतन्तीभिरिव कल्पवल्लीभिः प्रतिगृहद्वारपरिसरमतिचतुर[2]धरणीगीर्वाणाङ्गनाकारकिसलयाकलितकस्तूरीघनसारकुङ्कुमरजोमयविविधविचित्ररङ्गवल्लीभिः परिकर्मितासु साक्षाच्छेषात्मकेन गिरिणामुना निर्मुच्यमानैरिव निर्मोकैर्भगवतः सुखसञ्चारणार्थं सर्वत्र समास्तीर्णैः सितकौशेयैः परिमण्डितासु सर्वत्र समुज्जृंभमाणागरुधूपधूमस्तोमेषु पर्वताग्रनिषण्णनीलनीरदधिया प्राकाराग्रप्रनृत्यन्नीलकण्ठकण्ठनिरर्गलनिर्गलत्केकाद्विगुणितकाहलीनिनादमुखरितासु दिविचरैर्विबुधैरधः प्रहर्षितानां भूचरैर्विबुधैरूर्ध्वं समुत्कीर्णानां नानाविधकुसुमानां परस्परसङ्घर्षणप्रसरदपार परागपरम्परानिरासार्थमिव प्रचलद्भिः पताकादुकूलाञ्चलैः सञ्जनितवातपोतप्रचलितशिखाग्रतया सद्यः परिपीतनव्यगव्यघृत-

1. पुटकिरीविट (?) (ख) 2. परसरत्रिचतुर (ख)

माधुर्यं श्लाघमानैरिव प्रदीपसहस्रनिकरैः परिशोभितासु तत्तादृक्षसौधलक्षगवाक्ष निर्यत्क्षोणी ऋभुक्षी चकोराक्षीकटाक्षवीक्षाद्विगुणित नैल्यचूतलताप्रतानान्त रालमिलत्पृथुलप्रवालाविरलधवलमौक्तिकगुच्छवन्दनमालिकाबृन्द नीरन्ध्रितनभो-विभागतया भगवदुत्सवदिदृक्षासमागतगगनार्णवसंलग्नत्रिवेणीकत्वभ्रमं जन-यन्तीषु प्रचण्डदोर्दण्डरजतदण्डपाणिमण्डलकरकलितमर्मरारवरौरवचर्मकशाघात-सहस्रकिञ्चित्सान्तरालितजनास्वपि पुनर्दण्डप्रणतजलतटाकशैवालवदविरल-परिमलच्चोलकेरलनेपालादिनानादेशवास्तव्यजनावलीषु प्रतोलीषु सविलासं समायान्तं सुपर्णस्कन्धाधिरूढतया अर्णवराजकन्यकाधरणीभ्यां समन्वितया च सुवर्णाचलमधिगतं विद्युद्वल्लीसमाश्लिष्टं प्रावृषेण्यं जलदं तुलयन्तं पुरा किरीटाप-हरणप्रकरणे विगलितमेकं रत्नं किमियमेव भगवद्भक्तोऽप्यक्रूर इव स्यमन्तकं दुराशाया संगृह्यान्यदर्शनभिया निजहस्त एव निदधादिति संशयाकुलचेतसः स्कन्धारूढस्य कमलावल्लभस्य सन्देहापनोदनार्थं इव विवृत्य प्रदर्शितं विहङ्ग-पुङ्गवकरकमलयुगलं नान्यत्रापि मया निगूहितं तद्रत्नमिति मदीयचरणौ स्पृशेति प्रसारिताभ्यामिव मृदुपादकमलाभ्यां अलङ्कुर्वाणं अज्ञातवदननानालोक-जना अत्रोत्सवार्थमागतास्तेषां मध्ये वैरोचनिरपि निजपितृवद्वेषमुभयथा समाच्छाद्य भक्ततामेवाभिनयन् किरीटमपहरेद्यदि किं कुर्म इति भीजुषां भेजुषां निजसंनिधिं भक्तानां भयवारणार्थमिवाभयमुद्रिकामुद्वहन्तं मा भीतिं भजत, स तु पाताल एव वसतीति सूचनार्थमिव अधःप्रसारितवामहस्तं अथवा किरीठापहरणार्थं सोऽसौ समागमिष्यति चेत् एताभ्यां आयुधाभ्यां सपदि तद्गर्वनिर्वापणं करिष्यामीति कुतूहलेन धृताभ्यामिव शङ्खचक्राभ्यां विराजमान-निजभुजद्वयं कदाचन विहङ्गपुङ्गवपक्षश्रृङ्गसङ्गतमरतकशुकप्रवेकवपुः कान्ति-लहरीहरितितया कदाचन तत्त्रोटीपुटघटितपद्मरागमणिरुचिनिचयारुणिकृततया कदाचन निटिलबालेन्दुमध्यविलसत्कस्तूरिकातिलकमरीचिवीचिकामेचकीकृत-तया कदाचिदुभयपार्श्वसंवीज्यमानचामरदण्डप्रवालकाण्डकान्तिपटलपाटलीकृत-तया, कदाचन मुक्तातपत्रमणिघृणिद्विगुणितनैर्मल्यतया च ईदृग्विधमणिखचि-

तेयमित्यलब्धनिश्चयैर्भक्तजननिचयैर्निर्निमेषमुद्वीक्ष्यमाणां कुमुदिनीमिव द्विजराज-कराकलितप्रकाशं पुरन्दरपाणिवैखरीमिव वज्रशोभाविभासुरां नभःस्थलीमिव सद्रत्नकलितां हंसकाभिख्यामपि शिरसा धार्यमनिरुद्धमकुटीमाबिभ्राणं यदुभूभृद्रमणं समालोक्य सर्वेऽपि निरवधिकानन्दनिमग्ना बभूवुः ॥

तदानीं

नारदः—

चित्राङ्गदोदग्ररुचिस्सुभद्रा-
श्लिष्टो द्विजिह्वात्मजयान्वितोऽयम् ।
सरत्नपाञ्चालिकनैजगेहो
यतीन्द्रपुत्रत्वमितः किरीटी ॥ २१५ ॥

इन्द्रः—

किरीटी मम पुत्रत्वमयतीत्यर्थान्तरमपि श्लेषमहिम्ना कथितवानसि । श्रृणु मदीयं वचनम् ।

अभीमसौहार्दसमन्वितोऽय-
मद्रौपदीड्य स्फुटरागयुक्तः ।
अनर्जुनाभिख्य इतो विभाति
कथं किरीटत्वमसौ प्रपन्नः ॥ २१६ ॥

नारदः—

यः कृष्णबलभद्राभ्यां यदुभूभृत्पतेः पुरः ।
समानीतस्सुभद्रार्थं युक्तो याति किरीटिताम् ॥ २१७ ॥

इन्द्रः—

अलं किरीटित्वसमर्थनेन किरीटिनोऽस्य भगवतः परितः क इमे सेवापराः ?

नारदः—

द्विपश्चाशदेते द्विजाश्चामरं ते चलत्तालवृत्तश्चलामश्चकान्तं
कनद्धेमदण्डं कृपाणप्रकाण्डं महादर्शबिम्बं मणीन्द्रावलम्बम् ।
पतद्ग्राहमालूं स्फुरत्पुष्पमालां सकर्पूरवीटीं सितप्लोतशाटीं
कराब्जेषु कृत्वा विनीतिं च धृत्वा भजन्ति प्रकाशं
यदुक्ष्माधरेशम् ॥ २१८ ॥

इन्द्रः—(सशिरःकम्पं)

न जलद्याकलितमहाशुक्ताप्राप्ता[1] अमीनसच्छिद्राः ।
यदुशैलजनभाजो मुक्तौपम्यं भजन्ति ननु चित्रम् ॥ २१९ ॥

नारदः—

सद्वंशजन्मभाजस्सुगुणाकलिताः सुवृत्ततो हृद्याः ।
यदुशैलवासिनोऽमी मुक्तौपम्यं कथं त्यजेयुस्ते ॥ २२० ॥

इन्द्रः—(छत्रचामराण्यवलोक्य)

मुक्तातपत्रमिह राजति वज्रमौलि-
राकाशशाङ्कपरिवेष इव प्रकामम् ।
द्वे चामरे तु बिसखण्डधिया किरीट-
वज्रेषु सूद्धतमराळवदत्र भातः ॥ २२१ ॥

ततः पश्चद्वागमवलोक्य, क इमे परस्परगृहीतहस्ता पङ्क्तीभूय किमपि पठन्तो भगवन्तमनुगच्छन्ति ।

नारदः—

द्विजवरनिकरा एते वेदात्मानं द्विजं पुरस्कृत्य ।
अनुगच्छन्त्यनुसरणं कुर्वन्तस्तत्पदक्रमस्यैवम् ॥ २२२ ॥

---

1. न जळध्यानकलितमहाशुक्तावाप्त (ख)

इन्द्रः—

त्रिविक्रमपदासक्तः किञ्चिद्विक्रमवानयम् ।
एतत्पदानुसरणं कथं स्यात्क्रमचातुरीम् ॥ २२३ ॥

नारदः—

यत्क्रोधोपक्रमात्पूर्वं कृतवांस्त्वमपक्रमम् ।
तत्क्रमं किं विजानासि पश्याद्यक्रमचातुरीम् ॥ २२४ ॥

इन्द्रः—

अलं प्रसक्तानुप्रसक्त्या वेदक्रमपाठकानां पृष्ठतः पश्य करिणां श्रेणीं नदत् भेरीवहनधुरीणाम् ।

नारदः—

गिरिवरशिखरभ्रांत्या करिवरपृष्ठेषु सङ्गतिं भजताम् ।
जलदानां निनदमहं मन्ये भेरीपरम्परारावम् ॥ २२५ ॥

इन्द्रः—

(पुरतोऽवलोक्य) अत्रापि सन्ति स्कन्धाधिरोपितध्वजा महागजाः ।

नारदः—

नैते गजा अस्य गिरेस्तनूजा-
स्तदङ्कमारुह्य विहारभाजः ।
नैते ध्वजास्तच्छिखरप्ररूढ-
कुञ्जव्रजाः पल्लवतल्लजाग्राः ॥ २२६ ॥

इन्द्रः—

किमेषां पृष्ठभागे हया अपि सन्दृश्यन्ते ?

नारदः—

गजपङ्क्तिसंनिरुद्धा गतिचातुर्यादिह प्रनृत्यन्ति ।
डक्काश्वपङ्क्तिरेषा डिल्लीशसुतापतेः पुरो लसति ॥ २२७ ॥

इन्द्रः—

एषां पृष्ठतः क इमे मधुरतरं गायन्ति ?

नारदः—

एते किल परमैकान्तिशिरोमणयोऽध्यापकाः
सुप्रबन्धानुसन्धानगानैः ।
गन्धर्वपुङ्गवान् धिक्कुर्वन्तेऽपि गन्धर्वान्
पुरस्कुर्वन्त्यमी द्विजः ॥ २२८ ॥

इन्द्रः—(वाद्यवादकानवलोक्य),

मार्दङ्गिकावैणविकाश्च वैणिकाः
कुशीलवाः काम्बवीकाश्च कोविदाः ।
किरीटसेवापरतन्त्रचेतसोऽप्यहो
न मुञ्चन्ति लयस्वरादिकम् ॥ २२९ ॥

वारवनिताश्रेणीमवलोक्य,

वाराङ्गनामणीनां नृत्तं कान्तारकौमुदी भवति ।
विटपङ्क्तयोऽपि मकुटे विन्यस्तदृशो भवन्ति यदिदानीम् ॥

शची—(सासूयं)

सहस्राक्षेण भवता सर्वं सफलीक्रियते किल भगवदुत्सवेऽपि वाराङ्गनावलोकनेन,

इह पश्य मकुटसेवां स्वयमनुभूयादरान्निजं कक्षे ।
निद्राणशिशुदृगब्जं प्रोन्मीलयति प्रसह्य तरुणीयम् ॥ २३१ ॥

सा शिशुमेवं कथयति च,

अद्य स्तनं च मुक्त्वा सद्यस्तनपुण्डरीकसच्छायाम् ।
सुविचित्रवज्रमकुटी शोभलहरीं पिबात्र नयनाभ्यामिति ॥

इन्द्रस्तु तत्समीपतो निरीक्ष्य,

स्वर्णवल्लीस्वर्णाङ्ग्यो निर्निमेषविलोचनाः ।
किं घूर्जराङ्गनास्ता अथवा निर्जराङ्गनाः ॥ २३३ ॥

शचीः—

का वा भवन्तु ताः किं तद्विचारेण । यदेवं पतिव्रतावलोकनादिभिः किल पूर्वं गौतमशापविभवमनुभूतवान् भवसि । अतो भगवत्येव दत्तदृष्टिर्भव । नारदोऽपि सर्वानमरानवलोक्य, 'सर्वे सावधानाः पश्य भगवन्तम् । किञ्चिदवशिष्टोऽयं मुहूर्तः । मुहूर्तेऽस्मिन् अतिक्रान्ते पुनस्संवत्सरानन्तरमेव लभ्यमिदं किरीटदर्शनमि'त्यकथयत् । इति वीणामुनिवाणीमाकर्ण्य सर्वेष्वमरेषु सावधानं पश्यत्सु, रामप्रियो झटिति महामण्डपे यवनिकान्ते प्रविश्य किरीटान्तरं धृत्वा निजमन्दिरं प्रविष्टवान् । भास्करोऽपि वज्रकिरीटस्य पेटिकान्तर्निगूहनमाकर्ण्य इतःपरं भुवङ्गतस्यापि मम दिनदीपदशा भवतीति निर्भीकतयेव सपदि पारावारादुदयगिरिशिखरमारुरोह—

तस्मिन् दिनेऽपि रात्र्यां यदुशैलेन्दुः पतत्रिकुलधुर्यम् ।
आरुह्य भक्तजनता नयनेन्दीवरविकासकृत्प्रययौ ॥ २३४ ॥

तदानीं इन्द्रः—

वियोगभीत्येव विहङ्गनेतुः
पुनस्तमेवैष समारुरोह ।
तथापि जातः किल तद्वियोगो
विधीरितः केन निरुध्यतेऽत्र ॥ २३५ ॥

नारदः—

विरोचनप्रभावेन[1] विजितामृतहारिणा ।
अद्भुतं द्विजराजं तं सन्त्यजेत्कथमच्युतः ॥ २३६ ॥

गरुडमवलोक्य,

---

1. प्रभा येन (ख)

भास्वत्सारथिचरणाक्रमणस्यार्हो यदीयमूर्धा स्यात् ।
सच्चक्रसंश्रितो[1]ऽयं विष्णुरथत्वं यथार्थमनुभवति ॥ २३७ ॥

इन्द्रः—

रथचरणं रथिहस्ते निवसति रथ्या नभःस्थली यस्य ।
न च सारथिरत्रास्ते विष्णुरथोऽयं भाति विस्मयकृत् ॥२३८॥

अथ रामप्रियोऽयं रत्नपररम्परोज्वलनान्तकङ्कणात् पद्मरागोद्भासित-कण्ठाभरणात्[2] धृतमहापद्माद्रुचिरकण्ठशङ्खोज्वलरत्नोत्तंसादधरीकृतसुधाधरात् महाकल्पकद्रुत्साहभञ्जकौदार्याद्विनतानन्दनादहिगर्वनिर्वापणचतुरात् पत्रादवरुह्यैतान् गुणान्निजकलत्रेऽपि परीक्षितुमिव यद्वा श्वः करिष्यमाण वसन्तजल-क्रीडार्थं तां वीरलक्ष्मीमप्यानेतुमिव तदीयमन्दिरान्तः प्रविवेश ।

तदन्येद्युः—

कुङ्कुमपङ्कविहारं पङ्कजनेत्राभिरच्युतस्साकम् ।
कुर्वन् बहिरिव चान्तःकलयन् रागं रराज जलजाक्षः ॥२३९॥

अरुणार्द्रदिव्यवासाः[3] करुणाशाली यतीन्द्रतनयोऽयम् ।
तरुणाश्वरत्नगामी वरुणामोदाय मन्दिरात्प्रययौ ॥२४०॥

हृष्टस्तदा प्रचेता दृष्ट्वा श्रीशं वसन्तजलसिक्तम् ।
स तथापि विप्रचेतः प्रीतिः प्रबभौ न वारुणालोकः ॥२४१॥

अथ क्षणादलङ्कृतोऽपि लक्ष्मणैर्विभूषणैस्समारुरोह वारणं गिरीन्द्रगर्ववारणम् ।

तदामरास्तदङ्गभाक् सरोजमालिका सुते ।
सहस्रदृक्धिया भजन् हरौ पुरन्दरभ्रमम् ॥ २४२ ॥

तदा नारदः—

हरिरिह नैजस्कन्धे यस्मादिन्धे स एष करिराजः ।
निःश्वासमप्यमुञ्चन् न चलति नूनं महाभयोपेतः ॥ २४३ ॥

---

1. संश्रुतोऽयं 2. कर्णाभरणात् 3. अरुणाद्रिदिव्यवसनः (ख)

इन्द्रः—

ननु वाहनार्थमीशो नक्रग्रस्तं ररक्ष गजराजम् ।
नोद्दिश्य नैजमर्थं को वा लोकः प्रवर्तते जगति ॥ २४४ ॥

किञ्च

निजवक्षःस्थितलक्ष्मी कुचकुम्भौ किं करीन्द्रकुम्भाभ्याम् ।
संयोज्य तद्विवादं शान्तिं नेतुं स एनमधिरूढः ॥ २४५ ॥

अथवा

गजाधिपाप्तं ननु मां वदन्ति
सर्वे जना अप्यगजाधिपाप्तम् ।
अतस्तमारुह्य तदाप्तभावं
प्रकाशयामीति स तं किमागात् ॥ २४६ ॥

ततो भगवांश्चतुर्वीथीषु परिक्रामन् गजादवरुह्य तदीयगमनचातुरीं निजाङ्गनायामालोकितुमिव तन्मन्दिरमासाद्य अन्येद्युः प्रभाते देवीभिस्सह विविधविचित्रवस्त्रभूषणमालिकाभिरलंकृतो मन्दिरान्निर्गत्य सुमेरुसदृशमुत्तुङ्गं शताङ्गमधिरुह्य वीथीषु सञ्चचार । तदानीं नारदः,

किं मन्दरो रथोऽयं वासुकिरेषोऽथवा महारज्जुः ।
किं देवता द्विजेन्द्राः कर्षन्तोऽमुं न निश्चयो भवति ॥ २४७ ॥

इन्द्रः—

न रथोऽयं कनकाद्रिः नास्रौ रज्जुः फणीन्द्रमयामौर्वी ।
न च विप्राः प्रथमगणाः कर्षन्त्येनं शिवाग्रमानेतुम् ॥ २४८ ॥

भो पाकशासन, वस्तुतः भवदुक्तमेव समञ्जसम्, यतो रथोऽयं मेरुरिव आपादान्मौलिपर्यन्तं कनकमयस्सानुरूपविविधरत्नसर्वोत्तरो विबुधजनारोहणार्हस्सपरमहंसपुरस्सरस्थितिविराजिताग्रभागो गन्धर्वगणबन्धुरो विद्याधरविराजितः पुरुहूतप्रभृत्यधिष्ठिताष्टदिग्भागो मध्यभागाधिष्ठितचतुर्मुखः पुष्पवद्राजमान

1. मन्धरो

चक्रभ्रमणाश्रयश्चामरालंकृतः खगकेतुविराजितः पुरः शिखिद्विजराजमण्डलाधिष्ठितः सर्वोन्नतो विराजते ।

इन्द्रः—

भो नारद, किमत्र भवत्पितेव सारथ्यं करोति। ब्राह्मण एव रथमाकर्षयन्ति च ।

नारदः—

अन्यथा कथमस्य ब्रह्मरथत्वम् । यतः—

ब्रह्माधीना विप्राः कर्षणमेते रथस्य कलयन्ति ।
तत्प्रेरणे समर्थः कोऽन्यो लोके सरस्वती कान्तात् ॥ २४९ ॥

इन्द्रः—(साङ्गीकारं)

रथी च सारथी रथ्यास्सर्वे ब्रह्माभिधार्थताम् ।
भजन्त्यत्र ततो ह्यस्मात् कोऽन्यो ब्रह्मरथो भुवि ॥ २५० ॥

(ततः पुरोऽवलोक्य), किमिमा पञ्चमा अपि प्रविशन्ति भगवत्सन्निधिम् ?

नारदः—

अहह इत्यङ्गुलीभिर्वदनाच्छादनमभिनीय, न पञ्चमा इति वक्तव्यम् । प्रथमादप्यधिका इमे भगवत्किङ्करा श्रीकुलदास इति वक्तव्यम् । न शूद्राः । भगवद्भक्ताः श्वपचोऽपि महीपालेत्यादिकं किं न श्रुतवानसि ?

इन्द्रः—

कस्तादृश एषां महिमा ?

नारदः—

पुरा खलु लङ्केश्वर इव दिल्लीश्वरे रामप्रियाहरणं कृत्वा निजनगरीमानीतवति राम इव नारायणेऽस्मिन्निरुत्सवतामाश्रित्य गत्वा गत्वारुणभूश्रवः कुहरं प्रविष्टे वानरा इव ते इमे दासाः कुतश्चिद्दुष्टात् भीत्या पलायनमारचय्य गिरिवरमाश्रितस्य गूढरूपं श्री लक्ष्मणान्वितं भगवन्तं दृष्ट्वा अतिहृष्टस्य तमिमं

सोत्सवं कर्तुकामस्य सुमित्रात्मजस्य वशवर्तिनो भूत्वा तेन सह युद्धसंनद्धाः कोटिशः कोटिशस्सङ्घीभूय लङ्कामिव डिल्लीमासाद्य सुहृद्यवने तत्रापि अशोकाश्रितरामप्रियावलोकनसंहृष्टा यथापूर्वं सलक्ष्मीकं सरामानुजं भगवन्तं भास्वद्वंशभूभृत्पदमयोध्याभिमुख्यमानिन्युः । तदा प्रभृति भगवद्रामानुजाज्ञया प्रतिवत्सरमहोत्सवेऽस्मिन्निःशङ्कं भगवत्संनिधियोग्या भवन्ति[1] ॥

इन्द्रः—(सशिरःकम्पं)

अपञ्चमा इमे यस्मान्मधुवैरिणमाश्रिताः ।
मधुयोगे पञ्चमाख्य शब्दःस्यादवकाशवान् ॥ २५१ ॥

नारदः—

सत्यमुक्तं यदस्मिन् यादवाद्रौ पञ्चमशब्दः परभृतेषु, मधुवता भ्रमरेषु मातङ्गता गजेषु, चण्डालता विषवल्लरीनिकुञ्जेषु, पलाशता किंशुकेषु, पशुविशसनता[2] यज्ञेषु, पतत्त्रिघातो युद्धेषु, पङ्कशालिता पल्वलेषु, न तु श्रीकुलदासेषु कदापि संभवति ।

इन्द्रः—

अहो क्षणमात्रेण रथो बहुदूरं गतः !

नारदः—

विष्णुरथस्य वेगविशेषः किं वक्तव्यः ?

इन्द्रः—

विलसदनेकाक्षोऽयं विजितसुमेरुश्रियाष्ट चक्री च ।
वेगाद्वहन्मुकुन्दं विष्णुरथोऽयं प्रयाति खगकेतुः ॥ २५२ ॥

नारदः—(पर्वतस्य समन्तादवलोक्य),

अहो ! अन्यादृशीयं हरिसेवावैखरी भक्तजनानाम् । यदेतस्य गिरिराजस्य भगवदुत्सवागतनिखिलदेवताश्रयतया महामेरोरप्यतिशायिनीं

1. बभूवुः (ख) 2. पशुविशसतं (क)

महत्तामालोकितुं अभितस्समागतैरिव सामन्तपर्वतैः अथवा परितो विलसदुपत्यकास्फटिकशिलातलसंलग्नैरिव अस्यैव गिरेः प्रतिबिम्बैर्महद्भिरन्नराशिभिः तन्निःसृताभिरिव निर्झरझरीभिरपारघृतधारांभिः निजजामातुरुत्सवावलोकनार्थमागत्य गिरिमभितः प्रवहतेव कलशार्णवेन नव्यगव्यक्षीरपूरेण मुहुर्मुहुः देवास्सर्वे सङ्घीभूय क्षीरसागरमेव मथ्नन्ति । न हि मां कदाचिदप्यतोऽद्य सर्वे गीर्वाणा अपि यादवाद्रिमधिवसन्ति । ते मद्रसंज्ञैर्महीदेवैः दध्ना संतर्पिता विज्ञातमदीयरसा मामपि मथ्नीयुरित्याशया समागतेनेव पञ्चमसमुद्रेण दधिप्रवाहेण नानाविधव्यञ्जनसूपपूपादिभिश्चासंख्यातभक्तानुग्रहार्थं सहस्रधाङ्गीकृतानिव भगवद्रूपभेदान् सुवर्णझल्लरीनिभसुदर्शनसुश्वेतशङ्खालंकृत हस्ताम्बुजान् भगवद्दासान् सन्तर्पयन्ति ।

इन्द्रः—

अहो ! निमिषमात्रेण रथोऽयं यथास्थानं गतः । प्रभाकरोऽपि नभोगमनूरुसारथिना कलितमेकचक्रं निजं रथं दर्शयितुं लज्जित इव चरमगिरिकान्तारमुपगतः ।

नारदः—

इह पश्य, भगवानपि रथादवरुह्य वरवरमुनिमन्दिरे श्रमशान्तिसेवामङ्गीकरोति ।

इन्द्रः—

सुरवरमुने ! कोऽयं वरवरमुनिः ?

नारदः—

महाशेषः श्रीमान् प्रथममवतीर्यावनितले
विशिष्टाद्वैतार्थप्रकटनकृते भाष्यमकरोत् ।
स एव व्याख्यातुं द्रमिडनिगमान्तानपि पुन-
र्धरण्यां संजज्ञे वरवरमुनित्वं हि कलयन् ॥ २५३ ॥

इन्द्रः—

तर्ह्यस्य महिमा पूर्वमेव श्रुतः,

अवतारद्वयेऽप्येष शेषो वेदशिरो द्वयम् ।
व्याख्याय नैजरसना द्वयं सफलमातनोदिति ॥ २५४ ॥

शची—

तर्ह्यसौ श्रमशान्त्यर्थं शेषेऽस्मिन्नत्र मन्दिरे ।
शेते किमायताक्षीभिस्सह पङ्कजलोचनः ॥ २५५ ॥

इन्द्रः—

(विहस्य) मुग्धे ! गृहीतरूपान्तरः कथमिदानीं शयनोचितो भवत्ययं शेषः । अपि तु किञ्चिदातिथ्येन सन्तोषयति भगवन्तम् ।

नारदः—

(सकुतूहलं पुरोऽवलोक्य), अहो महोत्सवेऽस्मिन् प्रीतिजनकः पयोजवासिनीप्रणयकलह एकः सम्भविष्यतीति ज्ञानम् । दैवादिह ब्राह्मणानामपि परस्परकलहस्संप्रवृत्तः ।

इन्द्रः—

किमेतत्कलहनिमित्तम् ?

नारदः—

उत्तरकलाशालीनः केचन द्विजाः प्रथमं भगवदातिथ्यं वेदान्तगुरुमन्दिरे भवितव्यमिति । दक्षिणकलाशालिनोऽमी प्रथममत्रैवेति च परस्परं कलहायमाना भवन्ति ।

इन्द्रः—

तत्र किं किं विनिगमकं वदन्ति ?

नारदः—

श्रीमद्घण्टावतारोऽयं श्रीवेदमकुटी गुरुः ।
सर्वतन्त्रस्वतन्त्राख्यः कवितार्किककेसरी ॥ २५६ ॥

निस्समो गुरुरस्माकं सर्वोत्कृष्टा कला च नः ।
वर्णत्रयोच्चारणैकयोग्या स्त्रीशूद्रदूरगाः ॥ २५७ ॥

ततः प्रणवसादृश्यं भजत्येषा सनातनी ।
भाषाप्रबन्धस्सर्वेषां सुलभा भवतां कला ॥ २५८ ॥

तद्वाक्यविचारैकपण्डितो हि भवद्गुरुः ।
क्व मेरुः परमाणुः क्व गङ्गा क्व नु च पल्लवम् ॥ २५९ ॥

तस्मादस्माकमाचार्यसंनिधौ प्रथमं हरेः ।
आतिथ्यमिहकर्तव्यमन्यथा न कदाचन ॥ ॥ २६० ॥

इत्युत्तरकलाशालिनी वदन्ति । दक्षिणकलाशालिनस्तु,

साक्षाच्छेषः प्रथमतो वेदार्थविशदीकृतिम् ।
विरचय्य ततो तृप्तस्सर्वोज्जीवनकारणम् ॥ २६१ ॥

व्याख्यातं द्राविडाम्नायं पुनर्योगीन्द्रजन्मभाक् ।
बिभर्ति धरणीमेष दिग्गजाष्टकसंवृतः ॥ २६२ ॥

तावता भाष्यकारस्य पाण्डित्यं द्रमिडश्रुतौ ।
गुरोरस्य च वेदान्तेनास्ति किं शेषरूपिणः ॥ २६३ ॥

स्त्रीशूद्रैरपि सेव्यत्वं गुणः किं दोषतां व्रजेत् ।
सर्वावगाह्य गङ्गाया श्रेष्ठं[1] किं मणिकोदकम् ॥ २६४ ॥

स्पष्टव्यं नियमोपेतैर्यज्ञार्हमपि सन्ततम् ।
द्रमिडोपनिषत्वं च दृष्टत्वं शठवैरिणा ॥ २६५ ॥

1. श्रेष्ठः (ख)

भवतां गुरुरेवास्य प्रबन्धस्योक्तवान् किल ।
तन्मेरुपरमाणुत्वे गङ्गापल्वलते अपि ॥ २६६ ॥

व्यतस्ते भवतस्तस्मादस्माकं गुरुसंनिधौ ।
आतिथ्यं प्रथमं कार्यमन्यथा न कदाचन ॥ २६७ ॥

इति ।

इन्द्रः—

समयुक्तिकोऽयं विवादः कल्पसहस्रेणापि न शाम्यति। अत उभयत्रापि संवत्सरभेदेनातिथ्यप्राथमिकव्यवस्थया परिहरणीयो विवादः ।

नारदः—(सभग्नोत्साहः)

भो देव, तथैव व्यवस्थापितं तटस्थैः । किमस्माकमत्र ? अन्यत्र गच्छामः ।

इन्द्रः—(समन्दहासं)

भो मुनीन्द्र, मा कुरु मनःसङ्कोचम् । लक्ष्मीप्रणयकलहः श्वो भविष्यति। ततो भगवान् उभयत्रापि आतिथ्यमङ्गीकृत्य मन्दिरं प्रविष्टवान् ।

अन्येद्युः अम्बुजाक्षो निशि देवीभ्यां सहातुलां पृथुलाम् ।
आरुह्य रत्नडोलामातनोदतनुप्रहर्षदां लीलाम् ॥ २६८ ॥

चुम्बन्नम्बुधिपुत्र्या बिम्बोष्ठं[1] वसुन्धरावसनम् ।
विस्रंसयन् कराभ्यां उभयोस्तोषं हि दक्षिणोऽकलयत् ॥

कलशाब्धिकन्यकायाः कुचयोर्युगलं तथा धरण्याश्च ।
गृह्णन् चतुष्कराब्जैश्चतुरो निष्पक्षपाततामभजत् ॥ २७० ॥

जलधिसुतानयनाब्जं चुम्बन् देवस्तदा धरित्र्यूर्वोः ।
कुर्वन् करिकरलीलां तोषमनैषीदथ चमत्कृत्या ॥ २७१ ॥

---

1. बिम्बाभोष्ठं (ख) खरैः (ख)

गृह्णन् लक्ष्मीवदनाद्वीटीं पाटीरचर्चितो भूम्या ।
सुमनो सर्वैस्तदीयौ कबरीभारावलञ्चकारासौ ॥ २७२ ॥

अनुभवन्निवसुप्तिसुखं तदा क्षणमसौ विनिमीलितलोचनः ।
दयितयोर्युगलेऽपि तथाविधेह्यपससर्प रमारमणो बहिः ॥

ततो नटद्वोटमसौ समाश्रितो धाटीं झटित्याकलयन्नितस्ततः ।
कोटीर्वधूटीश्चटुला दिवौकसां संवीक्षमाणो मुदमातनोद्भृशम् ॥

सा कृतेक्षामस्य वीक्ष्याम्बुजाक्षी काचित्त्रस्तं
पृष्ठतस्स्वोत्तरीयम् ।
गृह्णन्तीवोद्धृत्य बाहुं प्रवल्गद्वक्षो जातं दर्शयामास
शौरेः ॥ २७५ ॥

किञ्च,

धर्तुं कुङ्कुमपङ्कं कञ्चुकमन्या भुजाद्यपोहन्ती ।
चुबुकेन हृदयचेलं बिभ्रत्येनं विलोकयामास ॥ २७६ ॥

पृथुमल्ली कुसुमसरान् वेणीमूले विधातुमुद्युक्ता ।
देवाय दर्शयन्ती भुजमूलमसौ तनोति संमोदम् ॥ २७७ ॥

स्रस्तं नीवीबन्धं द्रढयन्तीवापरा सरोजाक्षी ।
निजनाभीगाम्भीर्यं विषयीकुरुते स्म पङ्काजाक्षदृशः ॥ २७८ ॥

तदा चोरः कश्चित्करधृतकृपाणोऽतिनिपुणो
महालक्ष्म्या क्रोधस्सतनुरिव भीष्मस्तरल दृक् ।
चतुर्भिस्सच्छास्त्रैस्सह पथि निरुन्धन् हरिमसुं
विभूषादीन् हृत्वा झटिति विपिनाभ्यन्तरमगात् ॥ २७९ ॥

ततस्तदन्वेषणतत्परो हरिः
समन्ततस्तन्नगरी विशोधनम् ।
विधाय चोरान्विनतान्विशेषतो
गाथार्थलाभं प्रभजन्मुदं ययौ ॥ २८० ॥

प्राप्तोऽपि चौरस्तलयोज्य लक्ष्मीं
पुनस्सचोरस्थलयोज्य[1] लक्ष्मीम् ।
प्राप्तुं प्रवृत्तः किलसंनिरुद्ध-
स्तथापि सर्वैः कथितो निरुद्धः ॥ २८१ ॥

कस्त्वं द्वारि कवाटताडनपरो रामानुजस्यात्मजः
किं मारो न हि यादवक्षितिभृदीद् सोऽत्रापराधाश्रयः ।
किं प्राप्तस्त्वमसि प्रमुग्धमतिका रामप्रियोऽहं प्रिये
तर्ह्याशूपवनं भजेति कमलाकान्तस्तदा वञ्चितः ॥ २८२ ॥

अथ कथञ्चिदसौ यदुशैलराद् जलधिजा वसुधा च सदाश्रितः[2] ।
तदुभयं परिरम्भणचुम्बनप्रभृतिभिः परितोषमनीनयत् ॥ २८३ ॥

अथ सम्पत्कुमारो निजदयिताभ्यां सहावभृतस्नानार्थं मन्दिराद्विनिर्गत्य मनुजव्रजनिरन्तरितेन महापथेन मन्दं मन्दं गच्छन् अगण्यपुण्यमुनिवरेण्य-शरण्यं सीतारण्यं अवलोकयन् ततो निर्गत्य प्रातरारभ्यावभृतान्तं मानवै-रसंस्पृश्यतया निश्चले निर्मले जले प्रतिबिम्बितपूर्वतटस्थवटविटपबिम्बतया किं पुनरपि भुवमुद्धरन् वराहोऽद्य पातालादेतत्तीर्थमार्गणोद्गच्छतीति धियं जनयन्तीं उपरि गगनाङ्गणेषु सञ्चरतां मानवैरदृश्यानां त्रिदशानां प्रतिबिम्ब-करम्बितोदरतया पुरा सुचरितादयः केचित् गङ्गायां निमज्य अस्मिंस्तीर्थे समुद्गता इति पुराणेषु श्रुतमिदानीं प्रत्यक्षदृष्टं भवति । यतोऽत्र स्त्रीपुरुषा विचित्रवेषाः तीर्थोदरे संदृश्यन्ते । नूनमेते भागीरथ्यां स्नानार्थमवतीर्णाः तया सहात्रोद्भविष्यन्तीति शङ्कामङ्कुरयन्तीं तटं गताभिः स्नानकाले परस्परं क्रियमाणं हरिद्राचूर्णवितरणमवलोक्य अस्माभिः मानवाङ्गनाभ्यः तद्दातव्यमित्यूर्ध्वं प्रसारितैः सुवर्णसवर्णकर्णिकापदेशरजनीचूर्णपिण्डान्वितैरिव सलिलान्तर्गत वरुणान्तःपुरस्त्रीकरकिसलयैः कमलनिचयैर्विराजमानां स्नानार्थं प्रतीरमाश्रितानां

1. चोरस्तलयोज्य 2. वसुधावसथाश्रितः (ख)

नानादेशसुन्दरीजनानां लावण्यावलोकनाय नलिनीदलान्तरालजालकरन्ध्रप्रकटीकृतैरिव जलमानुषाङ्गाना नयनैर्गगनगतवैमानिकसीमन्तिनीमुखचन्द्रिरमन्दहासचन्द्रिकया दिवसेऽपि विकसितैः कुवलयजालैः परिकर्मितां पश्चिमभागविलसत् ज्ञानाश्वत्थप्रदक्षिणपरिभ्रमणतत्परद्विजसुन्दरीनिकरप्रतिबिम्बनिकुरुम्बसङ्कुलसलिलतया रासक्रीडापरतन्त्रगोपिकाबृन्दसान्द्रकलिन्दनन्दिनीह्रदमनुकुर्वन्तीं भगवन्महोत्सवसंप्राप्तं मङ्गलं समालिङ्य वात्सल्यस्नुतगिरिपयोधराया विश्वम्भरायाः कल्याणतीर्थापदेशाच्चूचुकरन्ध्रात् निःसरन्तीयं स्तन्यक्षीरधारा नूनमिति सम्भावितया मध्ये तीर्थं समुद्भवन्त्या गङ्गाझर्या समाश्लिष्टां गङ्गाप्रादुर्भावपरीक्षार्थं क्वचन कुङ्कुमपङ्केन क्वचिन्मृगमदकर्दमेन क्वचन हरिद्राक्षोदेन क्वचिच्चन्दनविन्दुना क्वचन श्वेतमृत्स्नया क्वचन विभूत्या च स्वस्वविभूत्यनुरूपं परितो जलोपान्तसोपाने विविधां रेखां विरचयद्भिः क्षणं क्षणं विरम्य अहो मदीयरेखा किञ्चिन्निमग्नेति मामकीना रेखार्धदघ्नजलेन परिपूर्णेति अस्मदीया रेखा सर्वापि मग्ना किञ्चिदवशिष्टेति अहो अस्मत्कुललाञ्छनं सोपानमेव निमग्नमिति सविस्मयं सकरतालमुच्चावचं प्रजल्पद्भिरेकैकस्मिन् सोपाने निमग्ने पुनरूर्ध्वं आरोहतोर्ध्वमारोहतेति परितो वेत्रपाणिभिस्समुत्सार्यमाणैर्मनुजगणैर्निरन्तरितसोपानपरम्परां भागीरथीसमागमातिशयनिर्णयं साक्षादनुभूय विस्मयान्वितैः नानादेशसमागतमहीपतिनिकरैः विकीर्यमाणेषु नवरत्नसहकृतकुसुमाञ्जलिषु तत्र तत्र कमलदलसंलग्नानि पृथुलमुक्ताफलानि समवलोक्य निजाण्डषण्डभ्रान्त्या सत्वरमुत्पत्य तानि चञ्चुपुटैः संगृह्णन्तीभिः मरालिकाभिरुपशोभितां तदीयपट्टमहिषीभिर्गङ्गाभ्यर्चनाय कुरविन्दमणिमयकङ्कणाद्याभरणेषु समर्पितेषु तत्र नवीनारविन्दभ्रान्त्या अनुगच्छन्तीभिर्मिलिन्दपङ्क्तिभिः समाकलितां ताभिः फलताम्बूलाद्युपहारेषु वितीर्णेषु तद्ग्रहणार्थं समुद्गच्छत्सु पुनर्विचित्रकञ्चुकदुकूलचेलेषु समर्पितेषु स्वनिरोधार्थं वागुराविस्तृतेति भिया पलायमानेषु शफरनिकरेषु मुहुर्मुहुः स्वकुतूहलं निःशब्दमुन्नमितां ग्रीवां निरुत्साहं पुनः पुनरवनम्रयन्तीभिः बकश्रेणिभिरधिष्ठितां क्वचिद् द्विजाङ्गनावितीर्णहरिद्राकुङ्कुम-

चूर्णशोणीकृततया क्वचन धूर्जराङ्गनासमर्पितकस्तूरीपरागपरम्परामेचकीकृततया क्वचन स्वतस्सिद्धनिर्मलतयात्र त्रिवेणीसमागमेऽपि किं केवलं गङ्गाप्रादुर्भावमामनन्ति गङ्गापदमुपलक्षकमिति मतिं पण्डितानां समुत्पादयन्तीं गङ्गामिवोदञ्चितमोक्षारोहिणोऽपि शिरसा धार्यजलां सरस्वतीमिव सुरुचिरागमहित विमलोदकां यमुनामिव यदुभूभृत्पतिजनक्रीडानुकूलां सरयूमिव प्रहर्षितहंसमानससरोजतां कावेरीमिव सदा सह्यागसमपि हितप्रवाहं कलयन्तीं समुदञ्चितरङ्गां च आकाशगङ्गामिव फणीन्द्रभूभृन्मूर्धसंश्लाघितसलिलां वेगवतीमिव सद्गुणाब्धिकाञ्चीधराश्रितां सगङ्गत्वात्यन्तादरणीयामप्यगङ्गत्वात्यन्तादरणीयां शुभ्राभिख्यामपि कल्याणाभिख्यां काञ्चित् सरसीमासाद्य तत्तत्तटमण्डपान्तः प्रविश्य भद्रासनमारुरोह । तदानीं,

इन्द्रः—

निजजनकात्तुहिनाद्रेरप्यौन्नत्यं भजत्ययं शैलः ।
इत्याकर्ण्य परीक्षां कर्तुं किमिहागताद्य सुपर्वनदी ॥ २८४ ॥

अग्निः—

सप्तक्षेत्राभिरामः सरुचिरपरमव्योमकेशस्सनागः
प्राप्तोऽयं सद्विभूत्या तुहिनगिरिजयाढ्यस्सतीर्थाष्टमूर्तिः ।
अस्त्यप्यन्यो गिरिशस्तमपि निजझरीव्याप्तशीर्षं तनोमी-
त्येषा किं देवसिन्धुः सपदि गिरिमगादेनमध्यक्षरूपा ॥२८५॥

यमः—

क्षोणीमुद्धृत्यसिन्धोरिह धरणिधरै तिष्ठतो विश्रमार्थं
पोत्रीशानस्यगात्राद्गलितजलकणश्रेणिरौदन्वतीयम् ।
कासारोऽभूदगाधः स च मम रमणस्याम्बुराशेः किलांश-
स्तत्सम्बन्धो ममाप्यस्त्विति किमु दिविपन्निम्नगात्राविरासीत् ॥

निर्ऋतिः—

यस्मादत्र सरोवरे सुरनदी पूरोऽभवन्मिश्रित-
स्तस्मात्किं न वदन्ति भेदमखिलाः कल्याणगाङ्गेययोः ।

नीरक्षीरविमिश्रणेऽपि मनुजैर्न ज्ञायते तद्भिदा
क्षीरक्षीरसुमेलने कथमयं भेदो जनैर्ज्ञायते ॥ २८७ ॥

वरुणः—

वैकुण्ठगङ्गेत्यपरा नदीयं गिरीशमासाद्य विभाति चेति ।
ईर्ष्यां भजन्ती त्रिदशस्रवन्ती किमागता तामधरी करोति ॥

वायुः—

मत्तीरवासैकरतास्समस्ता जना अपि श्रीयदुभूधरेन्द्रम् ।
प्राप्ता हि तत्राद्भुतमस्ति तादृक् किमित्यसौ किं
सरिदाविरासीत् ॥ २८९ ॥

कुबेरः—

कल्याणाभिख्येयं हरिसंसर्गादहं तु हरसङ्गात् ।
दुर्वर्णाभिख्यासीत्येषापि किमागतात्र हरिमाप्तुम् ॥ २९० ॥

शङ्करः—

जह्नोस्तनूजामपि मां वदन्ति दुर्वर्णरूपां यदहं पदाब्जात् ।
जाता हरेरित्यधुना किमेषा जज्ञे गिरावच्युत काननेऽस्मिन् ॥

एवं सहस्राक्षप्रभृतिषु गङ्गाविर्भावमनेकधा उत्प्रेक्षमाणेषु,

शुभरजनी चूर्णौघैरभिषिक्तोऽयं रमासखस्सद्यः ।
निर्मलसरसः स्वर्णाश्रियमयतिस्मोचितं तदा स्नातुम् ॥ २९२ ॥

कलितावभृतो निजाङ्गशैत्यं व्यपनेतुमिवाविशत्कृशानोः ।
सदनं हवनो[1]त्थितौष्ण्ययोगादिव कुम्भजलैश्च सिक्तः ॥२९३॥

तदन्येद्युः श्रीमानधिगतमहापुष्पयजनो
हनूमन्तं भान्तं विमलमधिरूढोऽभवदतः ।
खगेशो मत्सेवाक्रमणमधुना मर्कटपति-
श्चकारेतीर्ष्यावानिह किमवरूढो ध्वजगतः ॥ २९४ ॥

---

1. भवनो.... (ख)

ततो देवास्सर्वे विजनमपि नाकं ध्वजगतः पत-
त्रीशः पश्यन् शरणमभवत्सोऽद्य गगनात् ।
भुवं प्राप्तस्तस्मादिह सुरपुरी कां गतिमये-
दितीवानुज्ञाता सपदि हरिणा द्या समभजन् ॥ २९५ ॥

वर्षे वर्षेऽपि चैवं विबुधवरगणैस्सेव्यमानाङ्घ्रिपद्मः
कुर्वन् सर्वाश्रितानां निरवधिकमुदं प्राप्तदिव्योत्सवश्रीः ।
बिभ्रद्बिभ्राजमानो मणिमयमकुटीं कोटिसूर्यप्रकाशां
भूयः श्रेयः प्रदाता भवतु यदुधराधीशसंपत्कुमारः ॥ २९६ ॥

वर्धन्तां सर्ववेदाः क्षितिविबुधगणास्तत्प्रकाशप्रवीणा
वर्धन्तां ते प्रकृप्ता निखिलमखवरास्तद्भुजो निर्जरेन्द्राः ।
वर्धन्तां ते नुताङ्घ्रेर्यदुधरणिधराधीशितुर्वैभवौघा
वर्धन्तां तद्वदेतत्कविवररचितास्सुप्रबन्धाश्च भूमौ ॥ २९७ ॥

वन्दारुवृन्दमखिलं मन्दार इवावनीं गतोऽभीष्टैः ।
आनन्दधन्य इन्धे योगानन्दाय मङ्गलं भवतु ॥ २९८ ॥

इति श्री मौञ्ज्यायनकुलतिलकस्य यदुगिरीशचरणकमलार्चकस्य
योगानन्दभट्टाचार्यतनयस्यालशिङ्गभट्टस्य कृतिषु
वज्रमकुटीविलासः समाप्तः

॥ श्रियै नमः । हरिः ओं ॥

श्लोकसूची

	पृष्ठ
अ	
अग्रजोऽयं	६१
अङ्गारराशि	१५
अत एव	३२
अतुलामृत	१७
अन्तर्निरुद्ध	८
अन्तर्भवान्	२८
अत्राब्जनाभ	८
अत्रोत्कृष्ट	२५
अथकथञ्चिद्	७५
अथ कृष्णो	६१
अद्यस्तनं च मुक्त्वा	७३
अनिरुद्धमकुट	६१
अनुभवन्निव	८३
अन्येद्युः	८२
अपश्चमा	७८
अपि चास्ति	४९
अप्रबन्धोऽपि	६३
अभीमसौहार्द	७०
अरुणार्द्र	७५
असकृदमी	३७
अस्ति प्रशस्त	२
अवतारद्वये	८०
अविरल	५३
अहमम्बुजाक्ष	५०
अहिमर्दि	२३
अहीनोऽपि	३३
अक्षरलवण	६२

	पृष्ठ
आ	
आचान्त	२९
आचार्या बहवः	१८
आदाय वैनतेयो	५८
आनर्घ्यमुक्ताश्रित	२९
आलिङ्गन	२८
आलोक्य	५७
आहार	६४
इ	
इतिहास	२
इति वज्रमकुटमहिमा	६१
इत्यालोच्य	५५
इन्दिरविकच	२१
इह कृष्णस्स	६०
इह पश्य	७३
उ	
उत्सृज्य	५८
ऊ	
ऊर्ध्वनीता	५४
ए	
एते किल	७३
एवं भूषणजालं	४७
एष श्रीमान्	९
औ	
औन्नत्यं प्राप्य	५९

	पृष्ठ
क	
क इमे	३१
कमले	२१
कराश्लिष्ट	१०
कलशाब्धि	८२
कलितावभृतो	८७
कलिरेव	३३
कलेर्वर्ष	२
कल्याणाभिख्य	८७
कस्त्वं द्वारि	८४
कंसोज्झितापि	६०
काञ्चीपूर्ण	१९
कान्दिशीकेषु	५७
कालाम्बुद	५८
किं जातो	३८
किं मन्दरो	७६
किञ्चिल्लवणोपेतं	६२
कुम्भमण्डल	८
कुङ्कुम	७५
कुतोऽत्र	२०
कृष्णोत्तमाङ्ग	५९
क्वनु जलनिधि	२९
ग	
गजपङ्क्ति	७२
गजाधिपाप्तं	७६
गान्धर्वगीति	६८
गिरिवर	७२
गृह्णन्	८३
घ	
घोरासुरौघ	१८

	पृष्ठ
च	
चण्डप्रचण्डाविह	१६
चण्डाद्या	४९
चित्राङ्गदो	७०
चुम्बन्नम्बुधि	८२
चौर्याहृतं	४८
ज	
जय जय	२१
जनः कुदृष्टितां	३३
जलधिसुता	८२
जह्नोस्तनूजा	८७
त	
ततो देवाः	८८
ततो नट	८३
ततः प्रणव	८१
ततस्तदन्वेषण	८३
तत्तेजोभि	५८
तत्सूनु	१
तत्तादृक्षार्थ	६५
तत्रौघ	५६
तदधीनं	६५
तदन्येद्युः	८७
तदामराः	७५
तदा चोरः	८३
तद्वाक्य	८१
तस्माद्	८१
तस्मिन् दिनेऽपि	७४
तस्येमामति	५७
तर्ह्यसौ	८०
तावता	८१

	पृष्ठ
तावत्तस्य	६२
तावद्धंसाधि	३
तिलजीरिका	६२
त्रिविक्रम	७२
तुर्याश्रम	२६
तैस्साकं	४७
द	
दक्षिणावर्त	९
दर्वीमादाय	१६
दीनं सुतं	५६
देवेऽस्मिन्	६७
दोषाकरः	३५
दृप्यत्कुम्भीन्द्र	५६
दृष्ट्वा किरीट	४४
दृष्ट्वा निशां	२८
द्विजराज	३५
द्विजराजे	४
द्विजराजो	४
द्विजराजं	५
द्विजराजनाम	५०
द्विजवरनिकरा	७१
द्विपश्चाशदेते	७१
ध	
धर्तुं कुङ्कुम	८३
धृत्वा दिव्यं	६६
न	
न दीपकुम्भ	९
न जलजाद्याकलित	७१
न मया	४४
न हि वह्नि	१०
न स्मरणीय	३८
नन्दगोपतनयं	२४
नव्याम्बुद	५
न रथोऽयं	७६
ननु वाहनार्थं	७६
नारायणाय	१५
नाना वर्णा	६६
निर्दहति	१०
निर्दग्ध	१०
निजजनका	८६
निजवक्षः	७६
निजपुत्री	४०
निजभोग	४९
निजमूलस्य	६१
निबिडैर्निज	६६
निर्भिद्य	५८
निष्पक्षपातं	३४
निस्समो	८१
नित्यं विष्णु	१६
नीरक्षीर	८७
नैते गजा	७२
प	
पद्मोल्लास	३२
पत्युर्द्वयो	४६
पङ्कादम्बुज	३८
पक्षप्रोद्यन्	५४
पक्षीन्द्र	५६
पक्षीन्द्रेण	५८
पाण्युद्धत	३१
पातुं	९

	पृष्ठ
पिता परमहं	४
पितामहे	४
पितामहो	४
पुण्यजने	३५
पुष्पवती	२६
पृथुमल्ली	८३
प्रत्यूषकाल	२५
प्रदर्शयन्तो	६४
प्रक्षीण	६७
प्राप्तोऽपि	८४
ब	
बाणः क्षोणी	५६
बिभ्यद्रक्षो	१९
बिभ्रत्	५९
बिम्बातरुस्थ	६३
ब्रह्माधीना	७७
भ	
भक्ता भुक्ता	४७
भवतां	७३
भगवत्प्रबोध	५३
भाष्यकार	१९
भास्वद्दीप्त	६६
भास्वत्सारथि	७५
भुजगेन्द्र	४७
म	
मत्तीरवास	८७
मन्दार	६७
महतो	५९
महाशेषः	७९
मार्दङ्गिका	७३
मुक्तातपत्र	७१
मूर्ताविव	५८
मृगमद	२०
य	
या ब्रह्मजाति	५३
यातोऽङ्कुरति	२४
यो रत्न	४९
यः स्वप्न	२३
यः कृष्णाबल	७०
यज्जन्म	३९
यदयं	५०
यदुभूभृत्	३२, ६५
यदुभूधरेन्द्र	६५
यदुक्ष्माभृत्	१
यद्याज्ञात	६०
यत्क्रोधो	७२
यस्मादत्र	८६
यवनेश्वर	२९
र	
रथचरणं	७५
रथी च सारथी	७७
राकाशशाङ्क	५८
राजते	९
राजाधीनं	६५
रक्षोध्यक्ष	१८
ल	
लक्ष्मीकुचको	२८
लक्ष्मीं लब्ध्वा	४०
लक्ष्मीमुखं	२८
लाघवोऽपि	६६

	पृष्ठ
लोकाचार्य	२५
लोके कलङ्का	३५
लोके ह्युड्ड	३४

व

वयं भक्ताः	४७
वर्णत्रय	२५
वल्मीक	४९
वन्दारुवृन्द	८८
वर्षे वर्षे	८८
वाताशन	५
वाराङ्गना	७३
वाणीदत्त	२४
विधूमानल	८
विधुरिव	४
विनतानन्दनः	५
वियोगभीत्येव	७४
विरोचनप्रभावेन	७४
विलसत्	३६, ७८
विष्णुरपि	३८
विमलोर्ध्वे	३९
विहगाधिपस्य	५६
विज्ञाय	५६
विज्ञापनं	५१
वीक्षस्व	२३
वृन्दावनं	१८
वेदध्वनिं	२८
वेधा वृथा	३७
वेदान्तसूरि	६५
वेधा वृथा	३७
व्यतस्ते	८२
व्याख्यातं	८१
वैकुण्ठ	८७
वर्धन्तां	८८

श

शठरिपु	१६
शय्याभूतो	४९
शाण्डिल्य	३६
शुभरजनी	८७
श्रीपुष्टिजुष्ट	८
श्रीमद्यादव	१
श्रीमान्	१७
श्रीमानेष	२४
श्रीमान्यः	१
श्रीमाह्विरण्य	१
श्रीमद्घण्टावतारो	८१
श्रीरङ्गं	१३
श्रीवत्साङ्क	२७
श्रुत्वाघण्टा	२९
श्रुत्वा घण्टामतारो	८१
श्रुत्वा वाणीं	५३
श्रुत्वा विचित्रं	६०

स

स प्रबन्धस्य	६३
स हि गच्छन्नेव	३९
स तु मकुटीं	४४
सततं हरिसंश्लेषं	५०
सततं मारुतिः	२०
सद्यस्सवन	२०
सद्यः प्रोद्यत्	१९
सद्यस्तननवनीत	३०

	पृष्ठ
सद्विमुख	९
सद्वंश	७२
सवनस्थ	१०
स वामनोऽप्येष	५९
सर्वत्र	२०
साक्षात्	८१
सा कृते क्षाम	८३
सिन्धोः	५४
सुमनो	२३, ६६
सुरसचिव	५२
सुपर्वाणां	१६
सूर्यश्चन्द्रो	३४
सृगालवासुदेवस्य	६१
सेविता	२६
सोऽयं गिरीश	३२
सौवर्ण	३०
स्वर्णैस्सवर्ण	३०
स्वर्गाश्रितो	६७
स्वर्णवल्ली	७४
स्वाहारती	९
स्वस्ति प्रजाभ्यः	६१
स्त्रीशूद्रैरपि	८१
स्पष्टव्यं	८१
स्रस्तं नीवीबन्धं	८३
संश्रित	३२
सप्तक्षेत्राभिरामः	८६
ह	
हरिरद्य	१०
हरिरिह	७५
हरिणैव	३४
हिंसाशील	३
हृष्टस्तदा	७५
क्ष	
क्षीराम्बुधि	२२
क्षोणीमुद्धृत्य	८६